CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

KÂVYAMÂLÂ. 59.

THE AMRITODAYA

OF

GOKULANÂTHA

EDITED BY

MAHAMAHOPADHYAYA PANDIT SIVADATTA

Head Pandit and Superintendent, Sanskrit Department,

Oriental College, Lahore,

AND

KÂS'ÎNÂTH PÂNDURANG PARAB.

PRINTED AND PUBLISHED

BY

TUKÂRÂM JÂVAJÎ,

PROPRIETOR OF JÂVAJÎ DÂDÂJÎ'S "NIRNAYA-SÂGARA" PRESS.

BOMBAY.

1897.

Price 8 Annas.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(*Registerd according to act XXV. of 1867.*)

(All rights reserved by the publisher.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काव्यमाला. ५९.

श्रीमद्गोकुलनाथोपाध्यायकृतम्

अमृतोदयम्।

जयपुरमहाराजाश्रितमहामहोपाध्यायपण्डितदुर्गाप्रसाददारक-
केदारनाथकृपाङ्गीकृतशोधनकर्मणा महामहोपाध्याय-
पण्डितशिवदत्तशर्मणा, मुम्बापुरवासिपरवो-
पाह्वपाण्डुरङ्गात्मजकाशीनाथशर्मणा
च संशोधितम्।

१५१६४

तच्च

मुम्बय्यां निर्णयसागराख्ययन्त्रालये तदधिपतिना मुद्राक्षरैरङ्कयित्वा
प्राकाश्यं नीतम्।

१८९७

(अस्य ग्रन्थस्य पुनर्मुद्रणादिविषये सर्वथा निर्णयसागरमुद्रायन्त्रालयाधिपतेरेवाधिकारः।)

मूल्यं ८ आणकाः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूमिका ।

तार्किकशिरोमणिरुपाध्यायापरनामको महामहोपाध्यायपदभूषितः श्रीमद्गोकुलनाथशर्मा फणदहनामके मैथिलब्राह्मणवंशे प्रसिद्धतमे मङ्गरौनीलाख्यग्रामे पञ्चदशाधिकषोडशशततमशकाब्देऽसीमविद्यानिधिमहामहोपाध्यायश्रीमत्पीताम्बरशर्मण उमादेव्यालम्भि । स चायं विद्वद्वरेण्यः श्रीनगरे चन्द्रशेखरसुन्दरीचरणारविन्दमकरन्देन्दिराविलासमन्दिराणामरिवारिधिमथनमन्दराणां फत्तेसाहाभिधनृपवराणां राजधान्यां गुरुरिव निवसन्वादिवृन्दैरसमाधेयान्बहुविधान्ग्रन्थान्कृतवान्दर्शने स्मृतौ साहित्ये च, यानद्यापि मैथिलाः सगौरवं पठन्ति पाठयन्ति च । लिखितं च स्वकृतैकावलीग्रन्थावतारिकायाम्—

'वृत्तसागररत्नानां सारमुद्धृत्य निर्मिता ।
एकावली फतेसाह तव कण्ठे लुठत्वसौ ॥
विद्यानिधिक्षीरधिपारिजातमुमासुतं गोकुलनाथधीरम् ।
एकावलीसंघटनानिवेशे न्ययुङ्क फत्तेपतिसाहभूपः ॥' इति ।

अस्य च कादम्बरी नाम्न्येका दुहितासीत् । सा च दैववशाद्बाल्य एव जाह्नवीजले निमग्ना सती विगतासुर्बभूव । तद्वात्सल्येन तन्नाम्ना कतिपयग्रन्था अपि निर्मिताः । तथोक्तं कुण्डकादम्बरीभूमिकायाम्—

'आराम्बाव प्रकृतिकृपणा बाधिभिर्बाध्यमाने-
र्विक्रोशारः करुणवचनं पुत्रि कादम्बरीति ।
कोऽयं लोकः क इव विषयः किं पुरं को निवासो
यस्मिन्नस्मद्विमुखहृदया त्वं निलीय स्थितासि ॥
कुण्डकादम्बरीनामा ग्रन्थोऽयं तव कीर्तये ।
मया गोकुलनाथेन सोपपत्तिर्निबध्यते ॥' इति ।

सोऽयं देवकल्पो नवतिवर्षवयस्को भूत्वा काश्यां मुक्तिमवाप । अस्य च समकालीनो मिथिलाधिपतिरिदानींतनराजकीयखण्डरत्नाकुलावतंसमहाराजश्रीराघवसिंहाभिधो देवदेव इति ध्येयम् ।

अस्य च महात्मनो ग्रन्थाः—(१) चक्रराश्मिः—तत्त्वचिन्तामणिटीका, (२) पदवाक्यरत्नाकरः, (३) दिक्कालनिरूपणम्, । (४) मिथ्यात्वनिर्वचनम्, (५) कुसुमाञ्जलिटिप्पणम्, (६) काव्यप्रकाशटीका, (७) कुण्डकादम्बरी, (८) द्वैतनिर्णयटीका कादम्बरीनाम्नी, (९) कादम्बरीप्रश्नोत्तराणि, (१०) एकावली, (११) कादम्बरीकीर्तिश्लोकाः, (१२) शिवस्तुतिः, (१३) अमृतोदयनाटकं च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्य चामृतोदयनाटकस्यैकमतिजीर्णमतिशुद्धं पुस्तकं शाब्दिकप्रवर उपाध्यायोपनामकमहामहोपाध्यायश्रीमद्धर्षनाथशर्मणः सकाशादुपलभ्य नाटकस्य चातिरमणीयतामवधार्य तन्मुद्रणोद्विग्नचित्तोऽहं तल्लेखने प्रावर्तिषि । भाग्यवशादेकमपरमपि पुस्तकमग्निनार्धदग्धं प्राप्तम् । तत्साहाय्येन चैकमादर्शपुस्तकं संपाद्य मित्रवरश्रीमद्गोविन्ददासद्वारा संस्कृतकाव्यबन्धोद्धरणैकचित्तानां काव्यमालासंपादकानां सकाशं प्रापय्य स्वस्थचित्तोऽभूवम् । अत्रत्यानि च प्रायशः सर्वाण्येव टिप्पणानि प्राचीनपुस्तकस्थान्येव ग्रन्थकृता प्रदत्तानीव प्रतिभान्ति । क्वचिच्च स्थले आधुनिकजनाल्पबुद्धिविषमपदानां टिप्पणं तु मयैव प्रदर्शितानीति तस्य समीचीनत्वेऽसमीचीनत्वे वा सहृदयाः सुधिय एव प्रमाणम् ।

ललितपदनिबद्धं भावगाम्भीर्यगूढं
चरमचरपदार्थान्वर्णयन्तं मनोज्ञम् ।
बहुविधपरतत्वं नाट्यकाव्योपबद्धं
कठिनमपि सुबोधं सज्जना वीक्षयन्तु ॥

इत्याशास्ते

मिथिलेशसरस्वती-सदने-दरभङ्गा.

एम्. ए. पदविभूषित उपाध्यायोपनामको
गङ्गानाथशर्मा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काव्यमाला ।

श्रीमद्गोकुलनाथोपाध्यायकृतम्

अमृतोदयम् ।

प्रथमोऽङ्कः ।

ब्रह्माण्डविन्दुगणवर्षणवारिवाह
वज्रं च मुञ्चसि निषिञ्चसि जीवनं च ।
सृष्टं त्वया स्वपरदृष्टिविलोपकष्टं
निर्मार्ष्टुमर्हति तवैव विवेकविद्युत् ॥ १ ॥

अपि च ।

असकृदुपरमद्भिरङ्कभेदै-
र्नटगणनिष्क्रमणाद्विविक्तरङ्गः ।

[अत्र प्रस्तावनया साधनचतुष्टयसंपन्नोऽधिकारी सूच्यते । साधनानि तु—नित्यानित्यवस्तुविवेकः, इहामुत्रफलभोगविरागः, दमादिसंपत्, मुमुक्षा चेति चत्वारि । तत्र ब्रह्म नित्यमन्यदनित्यमित्यौपनिषदाः । फलेषु मोक्षो नित्यः स्वर्गाद्यनित्यानित्यान्वीक्षकाः । तत्र वेदान्तपक्षे नित्यमानन्दमयमात्मानमुद्दिश्य, न्यायमते तु निर्वाणनामानमपवर्गमुद्दिश्येदं वचनमात्मौपाधिकमितरेषां प्रियत्वमात्मैकतत्त्वतः प्रिय इति ब्रह्मविद्या । अपवर्ग एव न विशेषो भवितुमर्हति, सुखादि तु दुःखान्तर्भूतमित्यान्वीक्षकाः.]

१. जलम् जीवानि च. २. अत्र संसारो नाटकत्वेनाध्यवसीयते। तत्र सृष्टिव्यापारोऽङ्क इति, प्रलयं तदुपरम इति, जीवा नटा इति, जगद्रङ्गस्थलमिति निगीर्याध्यवसीयते । तत्र प्रलयरूपाङ्कोपरमे जीवनटानां वृत्तिनिरोधो निष्क्रम इति । अन्यत्र नाटके इति-तत्सूचनमामुखमादौ, ततो बीजोपक्षेपकार्यारम्भाभ्यां मुखसंधिर्विद्यत इति स्थितिः । संसारनाटके तु समाधिपरिपाके भवसार्वज्ञरूपा भूतेति प्रस्तावनान्तेन च परिचीयते बीजोपक्षेपसमयः संसारस्यानादित्वादिति व्यतिरेकः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अविदितसुखसंधिरामुखान्तो
निगमकवेस्तव नाटकप्रबन्धः ॥ २ ॥

किंच ।

न दहति सगरान्वयान्न पादा-
त्प्रभवति नाप्यलिकादुदेति चक्षुः ।
न च किमपि शृणोति नेत्रवर्गो
मम कथमस्तु तव स्तवेऽधिकारः ॥ ३ ॥

(नान्द्यन्ते)

सूत्रधारः—निर्वर्तित एष प्रेत्याहरणादिभिरङ्गैरुपबृंहितः पूर्वरङ्गः । सांप्रतमवसरो गुरोर्गोकुलनाथस्य गिरां प्रबन्धमभिनेतुम् । उपनतश्चासौ प्रशान्तपरितापोपप्लवः शिशिरमासः । इह हि

नोद्वेजयन्ति जनतामभिनयकर्मणि न खेदयन्ति नटान् ।
यामिनीः सुखीमा व्यायामसहा निशायामाः ॥ ४ ॥

अतिमात्रमत्र च खिदते मधुरातपस्तपस्यदिवसः । यत्र खलु

निभृतनिलीना नलिनीं विचिन्वतः पयसि रुचिपतेः पतितः ।
चिरदिरहतनुतरेभ्यः करेभ्य इव तीव्रतावलयः ॥ ५ ॥

(सनिर्वेदम् । आकाशे ।) अरे निसर्गसुन्दर, निरवसानसौभग, श्लाघनीयोऽसि ।

प्रसरति विषयेषु येषु रागः
परिणमते विरतेषु तेषु शोकः ।
त्वयि रुचिरुचिता नितान्तकान्ते
शुचिपरिपाकशुचामगोचरोऽसि ॥ ६ ॥

---

१. अत्र नाहं कपिलो न गोतमो न विरूपाक्षो नापि चक्षुःश्रवसांपतिः शेष इति पर्यायान्तरेणाभिधीयत इति. २. प्रत्याहारोऽवतारो दिक्पालसूत्रेत्यादिपूर्वरङ्गस्य द्वाविंशतिरङ्गानि नाट्यविद्यायां प्रसिद्धानि । तानि च नटस्यैव कर्माणि । रङ्गद्वारमारभ्य तु कविव्यापारः । सूचनापक्षे तु प्रत्याहरणं प्रायणम् । अवतरणं भवः । तेन प्रेत्यभावपर्यन्तमपरैव पूर्वरङ्ग इत्यध्यवसीयते । तस्य निर्वर्तनं चरमशरीरपरिग्रहात्. ३. शीतलाः. ४. माघफाल्गुनदिनम्. ५. अप्रविष्टपात्रोद्देश्यकवचनमाकाशभाषितम्.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(परिक्रम्य ।) अयमहं[1] भोः क्षेत्रज्ञनगरवासी मूलमस्मि सर्वस्यारम्भस्य रागो नाम कामरूपो नटः । तस्य ममामृतोदयं नाम नाटकमभिनिनीषतः पूर्वपरिगृहीतभोगभूमिकापरिहारेण विविक्तवेषपरिग्रहमुरीकुर्वन्तु भावमिश्राः[2] । (आकाशे ।) किमात्थ[3]—'अरे लम्पट पुराणनट, किमद्यापि नटसि । पश्य तावदेकधात्रिधैकविंशतिधाशतसहस्रधाव्यूहितविग्रहेण क्लेशगणेन प्रथममथपरमवैरिणा विरागेणाक्रान्तास्तव विषयाः' इति । (सभयमाकाशे[4] ।) हन्त । मम कांदिशीकस्य[5] कं देशमुपदिशसि । न खलु ममेदानीं कुटुम्बमवलम्बनाय । तथा हि ।

न खलु विघटिताः पुनर्घटन्ते
न च घटिताः स्थिरसंगतं श्रयन्ते ।
पिपतिषु सवशं रुजन्ति वश्या-
स्तरुतटमाप इवापगागणस्य[6] ॥ ७ ॥

अपि च । भीषयति विद्रुतमनुद्रवति मामेष कूटकर्मन्दीकालः[7] । पश्य ।

प्रतिगृहमतिथिर्गृहीतदण्डो[8]
धृतजगदण्डकमण्डलुप्रकाण्डः ।

---

१. अयमहमित्यारभ्य शोभत इत्यन्तप्रबन्धेन अन्यत्र सर्वत्र विरागो मोक्षे रागे इति मुमुक्षारूपसाधनं प्रस्तूयते । तत्र नाटकपक्षे सर्वस्य वाग्बुद्धिशरीरारम्भस्य प्रवृत्तिस्वरूपस्य रागो मूलम् । स एव मिथुनधर्मगोचरः काम इत्युच्यते । नाटके भोगभूमिवनितादिवेषः । विविक्तवेषेत्यादिभूमिकासूचनाया एकविंशतिदुःखान्तर्भूतसुखादिविषयता, विविक्तवेषो दुःखानुषङ्गिवस्तुगोचरता. २. भावा विद्वांसः, मिश्रा अधिकरणविदः. ३. किमात्थेत्यादिना वैराग्यं प्रपञ्चितम् । तत्र दुःखत्वजात्यभिप्रायेणैकधेति । आध्यात्मिकाधिभौतिकाधिदैविकभेदमादाय त्रिधेति । घ्राणरसनचक्षुस्त्वक्श्रोत्राणि पञ्च, गन्धरसरूपस्पर्शशब्दास्तद्विषयाः पञ्च, मन एकं तद्विषयो द्वेषेच्छाप्रयत्नस्वरूप एक एव, षड्विधा प्रात्यक्षिकी बुद्धिः, शरीरं सुखं दुःखं चेति एकविंशतिधा दुःखं भाष्यसिद्धम् । शतसहस्रधेत्यान्तर्गणिकभेदेन. ४. सभयमित्यादि तु शरीरसुखे यदि विरागेणाक्रान्ते तदा शरीरसंबन्धिषु कुटुम्बादिषु सुतरां विराग इति प्रपञ्चनाय. ५. 'कांदिशीको भयद्रुतः' इत्यमरः. ६. आपगा नदी. ७. कपटसंन्यासी. ८. यद्यपि नैयायिकानां भुवनभरणपात्रेभ्यः कालदिग्भगवद्भ्यो भिन्नो जीवादिरपि न कालादनीयस्तथापि चैतन्यविशिष्टस्य सत्त्वस्यात्यन्ताभाव एव कालभक्ष्यत्वं भगवद्भिन्नस्य सर्वस्यापीति.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भुवनभरणपात्रमात्रशेषं
मसृणमिदं जगदत्ति कालभिक्षुः ॥ ८ ॥

(प्रविश्य ।)

नटः—भाव, क्षेत्रज्ञनगरचरमसीमनि क्षणानुभवरमणीयो विविक्तविशदोऽयमाश्रमः । शममाश्रित्येह वधान धृतिमुपजापदुःस्थिते देवे महामोहे। विरागाक्रान्तेषु भोगविषयेषु निभृतनिवास एव भावस्य शोभते ।

सूत्रधारः—आः, किमवद्धं प्रलपसि ।

नाद्यापि श्रुतिगोचरः स विषयो यस्मिन्नमुष्य प्रगो-
गादेशः प्रतिहन्यते न स जनो यस्तस्य नास्ते वशे ।
आसंसारमखण्डयौवनतनोरक्षीणपक्षस्य च
क्षेत्रज्ञक्षितिनायकस्य रिपवः कुत्रोपजापः कुतः ॥ ९ ॥

नटः—भाव, एवमान्वीक्षकाः कथयन्ति—

विप्राकारे प्रविश्यात्र क्षेत्रज्ञनगरे श्रुतिः ।
सहान्वयं महामोहमुन्मूलयितुमिच्छति ॥ १० ॥

सूत्रधारः—मार्ष, किमुन्मूलितेन महामोहेन प्रयोजनमुपपद्यते श्रुतेः ।

नटः—भाव, नूनमद्वैतसाम्राज्ये श्रुतिरपवर्गमभिषेक्तुमीहते ।

सूत्रधारः—युज्यते साम्राज्यमपवर्गस्य यदि प्रजा रज्यन्ति । न च रोचते करणचक्रविप्रियः पुरुषायापवर्गः ।

नटः—भाव, दमेन निगृहीतानि करणचक्राणि । पुरुषोऽपि श्रुतिप्र-

---

१. क्षेत्रज्ञस्य आत्मनश्चरमसीमा सैव यत आरभ्य शरीरपरिग्रहः वर्तमानो मुक्तिरचिरमनुभूयते इति तिमिरान्धकारमतमाश्रित्य क्षणानुभवरमणीयत्वमुक्तम् । विविक्तो विशेषगुणैरसंभिन्नः । विशदः शुचिः. २. श्रुतिगोचरः कर्णगोचरः वेदजन्यप्रमितिगोचरो वा । तेन भगवद्गोचरं श्रवणमेवाधुना निष्पन्नम्, दूरे साक्षात्कार इति. ३. अक्षीणपक्षस्य अखण्डितरागद्वेषमोहैश्वराज्यस्य. ४. परिगृहीतब्राह्मणशरीरे, विगतप्राकारे वा. ५. युज्यत इत्यादिना संबलसंपदमिलन्तेन शमदमसंपत्तिप्रपञ्चनम् । करणचक्रविप्रियत्वमपवर्गस्य बाह्यानामान्तराणां चेन्द्रियाणां चापलात् प्रतिषिद्धसेवनात् नित्यवर्तनाद्वा भवेत् । तत्र दमेन बाह्यानि शमेनान्तरमिन्द्रियं कर्मणा च पापं निगृहीतमिति खदत एवापवर्ग इति समुदायार्थः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MoDF

भया प्रमित्या संगतत्वया विहितमनुतिष्ठति । प्रतिषिद्धं च वर्जयतीत्यर्जयस्यपवर्गमार्गसंबलसंपदम् ।

सूत्रधारः—मार्ष, प्रभवति विधेयेषु सह दुहित्रा प्रमित्या भगवती श्रुतिः । (सबहुमानमाकर्ण्य ।) भगवति भुवनभावुकभाविनि विश्वनिश्रेयसशरण्ये श्रेयसि श्रुते,

जननि तव पुमर्था एव पादाः प्रथन्ते
प्रथमचरणबद्धो निर्भरं रौमि वत्सः ।
चरमचरणमूलप्रस्नुतां स्तन्यधारा-
ममरगवि कदा ते मुक्तबन्धः पिबेयम् ॥ ११ ॥

(नेपथ्ये ।)

हन्त भोः सुगतशासनाध्वनीनाः, पर्यवष्टभ्यतामिदं क्षेत्रज्ञनगरम् । अपहरन्तु परेषां विज्ञानमपि मध्यममार्गेण संचरमाणाः । विलुम्पन्तु बहिर्विषयमाकारपराक्रमकुशलाः परपरिभवाय योगमाचरन्तः । परोक्षमर्थतिमिरमुष्णत्विष इव मुष्णन्तु लोकायतव्यवहारिणः । स्वार्थदर्शनमपि परेषामपलपन्तु सौत्रान्तसंस्कृतबुद्धयः । विकल्पगोचरादर्थमपनयन्तु स्वलक्षणाममीविभाषाभाषणप्रवीणाः । निखिलमपि प्रपञ्चमात्मसात्कुर्वन्तु पञ्चस्कन्धाः ।

---

१. कामः. २. मोक्षः. ३. ऐहिकामुष्मिकभोगेषु विरागोऽधुना प्रपञ्चनीयः । स च विरागो द्वेषो नामगुणो, न तु रागाभावस्तस्य शास्त्राधिकरणदशायामप्रवृत्तेः । भोगेषु द्वेषस्तु दुरन्तत्वज्ञानाधीनो दुरन्तत्वं त्वप्रमाणदर्शनसिद्धपुरुषार्थाभाससंबन्धात् । अतः पाखण्डदर्शनविवेचनान्तरमेतन्मतानुवन्धमैहिकादिभोगानामुपपादयति—नेपथ्य इत्यादिना. ४. माध्यमिकास्तावत्र केवलमर्थान् किंतु विज्ञानमपि शून्यं मन्यन्ते. ५. योगाचारास्तु विज्ञानमेव परमार्थसत् ज्ञानभिन्नमसदिति मन्यन्ते । स्वीकुर्वन्ति च ज्ञानस्यैव नीलपीताद्याकारम्. ६. लोकायतशास्त्रविदश्चार्वाकाः नाप्रत्यक्षं वस्तु विद्यत इति वदन्ति. ७. सौत्रान्तिका नाम सौगतास्तु ज्ञानाकारानुमेयो विषयो नालोचनस्यापि गोचरः, किंतु ज्ञानाकारविष्पादक इति मन्यन्ते. ८. स्वलक्षणं नाम वस्तु आलोचनप्रत्यक्षगोचरो न तु विकल्पकस्येति वैभाषिकाः. ९. संज्ञास्कन्धो रूपस्कन्धो ज्ञानस्कन्धो वेदनास्कन्धः संस्कारस्कन्धश्चेति पञ्चस्कन्धाः क्षणिकपरमाणुपुञ्जात्मकं [शरीरं] सदिति सर्वसौगतमतम्, तथा च शब्दो न प्रमाणमपि तु संभावनामात्रोत्थापक इत्यपि । नाटकपक्षे तु सर्वेषामेतेषां विविधसेनापतित्वं स्पष्टमेव.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षणमात्रमतिमात्रसूक्ष्मः माणितु भवतां दृष्टिमार्गेऽपवर्गः। संभावनावशे पततु श्रुतेर्दुहिता प्रमितिर्नाम।

नटः—भाव, एष महामोहसाधनाग्रणीः सुगतागमः श्रुतिदुहितरं प्रमितिमपहर्तुमारभते। तदपसरावस्तावत्।

सूत्रधारः—मार्ष, स्वपरविवेकविकलस्य पूर्वापरभूविभागविबोधविधुरस्य मे का संसरणचर्चा। (अनुध्याय। सहर्षम्। आकाशे।) भगवन् अद्वितीयवैभव पुरुषोत्तम, कुतो मम प्रतिभटाः। कुतस्तरां त्रासः। तथा हि।

रिपुरपकुरुते निहन्ति हन्ता
भवति भयं च पृथग्दृशो द्वितीयात्।
त्वयि भुवनमये निविष्टबुद्धे-
र्न मम रिपुर्न भयं न च द्वितीयः॥ १२॥

अपि च।

नित्ये विभौ मयि निसर्गशुचौ शरीर-
तादात्म्यबन्धमवरोपितवांस्त्वमासीः।
द्वैतोज्झिते त्वयि परापरवस्त्वभेद-
मारोप्य निर्वृतिमुपैमि चिरादिदानीम्॥ १३॥

नटः—भाव, क एष पुरुषोत्तमो यमाक्रोशसि।

सूत्रधारः—नन्वेष वाङ्मनसयोरगोचरोऽपि
ब्रह्माण्डविन्दुतिलजालवहो विहीनः
सर्वेन्द्रियैर्विकलकर्मशरीरबन्धः।
हृद्देश्म मे प्रविशति श्रुतिदेशितेन
मार्गेण कोऽपि जगतीप्रपितामहोऽसौ॥ १४॥

नटः—ननु भाव, वचसामगोचरं वस्तु वचसैव श्लाघमानो व्याहतिमपि न चेतयसे।

सूत्रधारः—अयमसांविह व्याहतिपरिहारः।

---

१. प्रसङ्गादद्वैतभावनैव भयसामान्यविनाशाय नत्वपसरणादिरिति सूचयन्नेव पताकास्थानकेन भाविनं ब्रह्माद्वैतबोधं सूचयति—परापरेत्यादि. २. 'योगः' इति पाठः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MoDF

साकाङ्क्षास्तत्वरास्तं प्रियमपि मनसा साकमप्राप्यमार्गा-
द्वाचो वाढं निवृत्ताः कुलगुरुषु गिरा वारयत्त्यागमेषु ।
किंतु स्वेनैव कामादभिसरति परः पूरुषो वाग्भमेनां
सेन्नासेन्नासुसीमस्वपि निगमगणस्तं हि न द्रष्टुमीष्टे ॥ १५ ॥

(नेपथ्ये ।)

अरे वाचाट नटबटो, हताशया श्रुत्या विप्रलब्धः किमलीकमालपसि।

तथा हि सिद्धः पुरुषोऽपि पञ्च-
स्कन्धान्विना नात्र शरीरकोशे ।
मानद्वयागोचरवस्तु नस्तु
सिद्धिर्विदूरे पुरुषोत्तमस्य ॥ १६ ॥

सूत्रधारः—अये, कुपित इव सुगतागमः शब्दायते । तदुपहाय महामोहपरिवारपाखण्डगणाधिष्ठानदुर्विपाकामैहिकभोगभूमिमाश्रयाम्यद्वैतनिर्वृत्तां निर्वाणकाष्ठाम् ।

नटः—भाव, रागकर्मप्रसादितदेवतोपनीताः पौरुषातिशयसाधिता वा क्लेशलेशास्पृष्टाः परत्र भोगभूमय एव सेव्यन्ताम्, किमसत्य शून्याश्रयणेन।

---

१. आकाङ्क्षातात्पर्यवतीनां वाचां भगवन्तमप्राप्य निवृत्तौ बीजमागमैर्वारणमेव तथा चागमः—'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' इति । वस्तुतोऽभिमते साक्षात्कारात्मके ब्रह्मबोधे शब्दस्यासामर्थ्यमात्रं श्रुत्या बोध्यते । भगवदनुग्रहवशात् भगवद्विषयिण्यो लौकिकवाचोऽपि संभवन्ति, किं पुनर्लौकिकगिर इति हृदयम्. २. यथा तमभिसरन्तीं वाचमागमो वारयति, तथा वागभिसारिणं पुरुषोत्तममागमो वारयितुं न प्रभवति । पुरुषोत्तमदर्शने निगमानामसामर्थ्यादिति काव्यरीत्या परिहारः. ३. रूपरसगन्धस्पर्शशब्दाः, रूपस्कन्धः, निर्विकल्पकं विज्ञानस्कन्धः, सविकल्पकं ज्ञानं संज्ञास्कन्धः, समनन्तरप्रत्ययः संस्कारस्कन्धः, सुखदुःखे वेदनास्कन्धः इति पञ्चस्कन्धाः । स एव आत्मेति सौगताः. ४. तदेवं लौकिकभोगा एवाखण्डैः पुरुषार्था इत्युच्यन्ते, ते च बन्धजनकतया हेयाः, इति तत्र विरागमुपपादयति—तदुपहायेत्यादि. ५. ननु, वैदिकपुरुषार्थत्वादानुश्रविको भोगो न हेय इत्याक्षिपति । पारलौकिकफले जनीये देवताप्रीतिरेव यज्ञव्यापार इति वेदान्तविदादयः । पुरुषनिष्ठोऽतिशयो धर्मस्वरूपं तथेति मीमांसकादयः । शून्यस्य सुखदुःखसंभेदविरहितस्य निर्वाणस्याश्रयणं रागस्य न युज्यते तुल्यामन्ययत्वात् किंतु दुःखासंभिन्नस्य सुखमयस्य स्वर्गस्येत्याक्षेपार्थः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सूत्रधारः—आर्ष, विमर्षविरसे विषयतर्षापकर्षाय न क्षमते दैवत-प्रसादोपनतो भोगः। तथा हि।

> राज्यैराज्यमुपाकृतं शिखिमुखेनास्वाद्य तन्निष्कयं
> क्षीरोर्ध्वेर्नवनीतबिन्दुभमरा यच्छन्ति कालान्तरे।
> तं पीत्वा जननीपयोधरघटात्पुत्रस्य वा तर्जनी-
> मूलप्रस्रवणात्पयांसि तृषितः पातुं जनो धावति ॥ १७ ॥

अपि च।

> मुहुर्मिहिरतप्तेन सोमपात्रेण संभृतम्।
> न लिप्से राहुमार्जारपीतोच्छिष्टं सुधादधि ॥ १८ ॥

नटः—तथाप्यपरिचितचरी निर्वाणकाष्ठेति कथमेनामाश्रयितुमीहसे।

सूत्रधारः—श्रुतिर्वर्णितमस्या रामणीयकं क्षणमनुभूय पारमाप्स्यामि दुरन्तसमुद्रस्य।

(नेपथ्ये।)

अरे भरतवंशकुर्भग, का नाम श्रुतिः। अयमहमस्या हताशाया हरामि दुष्टदारिकां प्रमितिम्।

सूत्रधारः—(ससंभ्रमम्।) हन्त, हृता श्रुतेः प्रमितिः सुगतागमेन।

(नेपथ्ये।)

हा नाथ, कथमुपेक्षसे। किं वा

> प्रभवति मतये पदप्रबन्धो
> न तव निरत्ययनित्यचेतनस्य।

---

१. मन्त्रवद्ब्रह्मसंस्कृतम्। अग्निर्वै देवतानां मुखम्. २. अमृतबिन्दुम्. ३. आनुश्रविको भोगः क्षयी—'तद्यथेह कर्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षीयते' इति श्रुतेः। प्रेत्यभावपरम्परापरिणामस्याविरामाच्च स्वर्गो हेयः। तत्र जननीपयोधरपयःपानेन जन्मोपलक्ष्यते, पुत्रतर्जनीमूलोदकपानेन च प्रायणम्. ४. 'दुःखाभावोऽपि नावेद्य पुरुषार्थतयेष्यते। नहि मूर्धावस्थार्थं प्रवृत्तो दृश्यते सुधीः॥' इत्याक्षिपति—तथापीति.' ५. वेदनं परोक्षमपरोक्षं वापेक्षितम्। आद्ये विद्यत एव श्रौतो मोक्षबोधः। अन्त्ये वर्तमानापि मुक्तिरचिरं मुक्तैरनुभूयत एवेति समाधत्ते—श्रुतीति. ६. निरत्ययोऽविनाशी, अत एव नित्या त्रैलोक्यव्यापिनी चेतना यस्य.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MoE

न भजसि करुणामतो सुरारे
मम कृपणैः परिदेवितप्रपञ्चैः ॥ १९ ॥

अयमथ वा भवन्तं प्रति वाचोयुक्त्या
अभिलषितमथानुचिन्तितं यो
हृदयगुहानिहितः शृणोत्यकर्णः ।
न मसु(?)मवचनं च वाग्मिता च
प्रभवति मन्त्रयितुं त्रयीभुजङ्गम् ॥ २० ॥

सूत्रधारः—इयमसौ परैरपह्रियमाणप्राणा प्रमितिरशरणशरण्यचरणं पुरुषाणामुत्तमं त्रातारमाक्रोशति ।

(नेपथ्ये ।)

अचिन्तनीयानि तव स्वन्तदुरन्तसर्गप्रलयविलसितानि ।
निगमवनवनस्पते प्रसूते
कति जगदण्डमयान्युदुम्बराणि ।
दधति बहलजन्तुजालमन्तः
पुनरपि तानि लयं त्वयि प्रयान्ति ॥ २१ ॥

सूत्रधारः—इयमसावगणितदुहितृव्यसनशोकवैशसा श्रुतिरुदश्लोकयति लोकोत्तरपुरुषम् ।

(नेपथ्ये ।)

अरे(?) प्रमाणमानिनि, तदियं तावन्न भवसि ।

सूत्रधारः—अयं तावदनृतव्याघातपुनरुक्तनामा सुगतागमाग्रणीरप्रमाणधर्मगणः श्रुतिमभिधावति ।

---

१. परिदेविते न करुणा वाक्यार्थबुद्धिजननद्वारैव जन्यते। तव तु बुद्धिरजन्या न वचनसाध्येति. २. अनुचिन्तितस्यापि अर्थस्य श्रवणहेतुः हृदयगुहाशयनम्, भुजङ्गपदसूचनीयम्, त्रय्याः पन्नगोपमानमुपपादयितुमकर्ण इति । यः पुनरवचनेनापि मन्त्रयितुं शक्यते तं प्रति किं वाचोयुक्त्येत्युपपत्तिः. ३. अनृतं पुत्रेष्ट्यादिविधौ फलविसंवादः । व्याघातः विहिते उदितहोमे 'ऐन्द्रीऽस्याहुतिमभ्यवहरति' इति निन्दार्थवादवशात् । पुनरुक्तम् 'त्रिः प्रथमामन्वाह' 'त्रिरुत्तमामन्वाह' इत्यत्रैकस्यार्थस्य द्विरभिधानात् । एतेऽप्रमाणधर्माः श्रुतेः प्रामाण्यं हन्तुमारभन्ते । तत्समाधानतर्कास्तु कर्मकर्तृसाधनवैगुण्यात् इत्यादिना द्वितीयाध्याये विवृताः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(नेपथ्ये।)

गृहीतं तर्काः प्राप्तग्राहममीषामागमद्रुहां गणम्।

सूत्रधारः—इयमान्वीक्षकी तर्कैः सह परनिग्रहायावतरति, यामुपजीवन्ति निजनिजनिश्रेयससाधनायेतरास्तिस्रो वार्तात्रयीदण्डनीतयो विद्याः।

अपवर्गः पुमर्थानां प्रमाणं तत्त्वसंपदाम्।
आन्वीक्षकी च विद्यानां चतुर्वर्गशिरोमणिः॥ २२॥

तावदेव पुरुषो विधिनियोगवशंवदो यावदेनामान्वीक्षकीं नोपास्ते।

मिलति नयनमक्षपादपाद-
प्रणिपतनेन ललाटसीम्नि यस्य।
विधिरपि पुरुषस्य तस्य भाले
लिखितुमदृष्टलिपिं कुतः क्षमेत॥ २३॥

(नेपथ्ये।)

अरे परिचारविद्याः, सर्वे अपि यूयमनुयात प्रसभमभ्यमित्रीणामायुष्मतीं वत्सामान्वीक्षकीम्।

सूत्रधारः—श्रुतिनिदेशसमनन्तरममूरभ्यमित्रं परापतन्ति तर्कनासीरा विद्याः। तदितः साधयावः।

(इति निष्क्रान्तौ।)

इति साधनचतुष्टयसंपत्तिर्नाम प्रस्तावना।

---

१. वार्ताविद्याया निश्रेयसं कृष्यादिसंपत्, त्रय्यास्तु स्वर्गः, दण्डनीतेः समाक्षा राजसंपत्। तया तया विद्यया यथा स्वस्यनिश्रेयसे जनयितव्ये आन्वीक्षक्या उपयोगस्तथा टीकायां व्याख्यानं व्यक्तम्. २. अर्थो धर्मः कामो मोक्ष इति पुरुषार्थचतुर्वर्गो भारतादौ प्रमाणं प्रमाता प्रमितिः प्रमेयमिति तत्त्वसंपत् चतुर्वर्गो न्यायभाष्यवार्तिकयोः आन्वीक्षकी त्रयी वार्ता दण्डनीतिरिति। विद्याचतुर्वर्गो भाष्ये प्रसिद्धः। तत्रान्वीक्षकी प्रमाणादिपदार्थान्, त्रयी यज्ञम्, वार्ता हलशकटादिव्यवहारम्, दण्डनीतिर्नृपधर्मान् बोधयति. ३. ललाटमिलितेन चक्षुषा दृश्यमाना ललाटलिपिरदृष्टत्वमेव जहातीति ध्वनिः. ४. अमित्रमभिप्रस्थिताम्.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitized by eGangotri.Funding: MoE-IKS

(ततः प्रविशति श्रुतिरान्वीक्षकी च।)

आन्वीक्षकी—भगवति, दिष्ट्या वर्धसे द्विषन्निग्रहेण दुहितृप्रत्याहरणेन च ।

श्रुतिः—वत्से, कथमुत्सिक्तविक्रमा परे परिभूता, कथमभ्युपापाद्यत वत्सा प्रमितिः ।

आन्वीक्षकी—भगवति, मन्निसृष्टेन तर्कगर्णेन बाध्यमानेष्वनृतव्याघातपुनरुक्तेषु, भवदवयवावनव्यासक्तासु परिवारविद्यासु, परेषां नृशंसप्रहारेभ्यश्चानेन जनेन परिपाल्यमाने निरिन्द्रियविकलतनौ तव पितरि पुरुषे, कुतोऽप्यतर्कितोपनता मिथ्याद्दष्टेरात्मसंभवासंभावना नाम । विकटदंष्ट्राकोटिद्वयसंकटेन करतालसंकलितालीकाट्टहासधूमायितधूसरिताकाशेन तरलेतरतडित्काण्डकडारलोचनार्चिरर्चितस्फुलिङ्गितदिङ्मुखेनाननेन(?) असितुमारेभे प्रमितिम् ।

श्रुतिः—वत्से, तदात्वे वर्तमाना किमभाषत वत्सा ।

आन्वीक्षकी—तदा पुनः प्रकर्षापकर्षपिशुनेन वचनेनाधिचिक्षेप पुरुषोत्तममेव प्रमितिः । तथा हि ।

विषमनिगमकाननान्तशाखा-
ततिषु निलीय परान्निरीक्षमाणः ।
परिणतिविदलज्जगत्कपित्थ-
ग्रसनकपे सुचिरान्निरूपितोऽसि ॥ २४ ॥

---

१. अथ साधनचतुष्टयसंपन्नोऽधिकारी । गुरुमुपसीदन्नन्वीक्षासंस्कृतया श्रुत्या परमात्मानं प्रमिमीते । 'श्रोतव्यः श्रुतिवाक्येभ्यः' इति श्रवणात् । तत्र च सौगतमतप्रसिद्धकुतर्कनिरासद्वारेणान्वीक्षक्या उपयोग इति नाटकेतिवृत्तव्याजेन [विशदयति]. २. अभ्युपपत्तिर्विपदुद्धारः. ३. एतेन शिक्षाव्याकरणादीनां श्रवणोपयोगो दर्शितः. ४. अनादिरलीकार्थविषयिणी वासनासंततिर्मिथ्याद्दष्टिस्तत्प्रभवा असख्योनयस्तान्त्वे(?)कोभयकोटिगोचरा संभावनान्तर्भवति । सैव शाब्दप्रमितिकर्तव्यं व्यवहारं नयतीति सौगतमतम्. ५. कोटिद्वयं संभावनाया विरुद्धौ प्रकारौ. ६. अचेतनानां संभावनादीनामाननादीन्युत्प्रेक्षाकल्पितान्येव.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitized by eGangotri.Funding: MIDF

अपि च ।

द्रुहिणभवन्नपद्मबीजमाला-
मणिपरिवर्तनतत्परात्मनस्ते ।
ग्रसितुरखिलमेव जन्तुजातं
विजनयतो विदिता विडालवृत्तिः ॥ २५ ॥

श्रुतिः—ततः ।

आन्वीक्षकी—ततोऽस्माकं नासीरपरिसरे पूरयन्निव रोदसीविवरमुत्पतितपतितनक्षत्रलाजविकिरणाकुलदिक्कुमारीकदम्बकिर्मीरिताम्बराजिरो जर्जरितमूलकुलाचलकुलकन्दुककीडनाकुलया मुहुरवनतोन्नतया प्रतिपदमवनिवनितया वितायमानधूलिपाटीपटवासपटलो निर्भरभयचकितदिक्कुञ्जरत्यक्तगुरुतरभूगोलभारभुग्नभोगिमल्लभोगाभोगभङ्गुरभुवनः सरंभ्रमभ्रश्यदैरावतबृंहितोपबृंहितोदध्वानसेनासंनहनदुन्दुभिः । येन स्म जनितविस्मयेन जनतास्मयधस्मरेण करणहारकेण कोणाभिघातमूर्छितमरुदुद्धूयमानविमानाध्वनीनेन विध्वनता ध्मायमाने

प्रेसभनिविशमानकालसर्प-
प्रतिहतनिर्गमणे खगोलनीले ।
बहुविधगतयो विविक्तजाया-
सुतजननीतनवः खगा भ्रमन्ति ॥ २६ ॥

अपि च तदानीं

कोणाहतिध्वनितदुन्दुभिभिद्यमान-
ब्रह्माण्डखण्डयुगझर्झरतालजालैः ।
जृम्भालकाललललनालपनाट्टहास-
मित्रैर्ननर्त जगदन्ततटः कृतान्तः ॥ २७ ॥

---

१. 'सेनामुखं तु नासीरम्' । २. येन ध्मायमाने खगोलनीले खगा भ्रमन्ति स्मेति संबन्धः. ३. चन्द्रमसो जाया नक्षत्राणि, रविचन्द्रयोस्तनयौ शनिबुधौ, कुजस्य जननी भूमिः—एते परस्परविभक्ताः । राहुकेत्वोस्तु तनुरेवान्योन्यविभक्तेति । खगा ग्रहाः । कृष्णसर्पोपरुद्धनीडमध्ये विकलभ्रमत्पतगतादात्म्येनाध्यवसीयन्ते.

Nepal Sanskrit University, Balmeeki Campus; Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रुतिः—ततः किमारभन्त परे ।

आन्वीक्षकी—ततः सर्वे चार्वाकसौत्रान्तिकवैभाषिकवैनाशिकयोगाचारमाध्यमिकप्रभृतयः सुगतागमसेनापतयः 'इतः [1]कीर्तिः, इतो ज्ञानश्रीः, ततो दिङ्नागः' इति क्रमन्तादस्मद्बलं परिवेष्टयांबभूवुः ।

श्रुतिः—हन्त, [2]दुर्वारबला वैरिणः ।

आन्वीक्षकी—अथ सेनाकोणादन्तिकमागत्य काणादी[3]संहिता मामन्त्रयत्—'सखि गौतमि, शाम्यतु सुगतागमेन सह वैरम्, [4]परित्यजामियं श्रौती प्रमितिः, अस्तु भगवत्याः श्रुतेरपत्यकृतिका पक्षतापरामर्षयोरपत्यमनुमितिर्नाम' इति । ततो मया मन्त्रितम्—'असमञ्जसमिदमुदाहरसि । [5]प्रथमं योग्यतैवात्र न श्रुतेरवधार्यते । नाकाङ्क्षति परापत्यग्रहणं तादृशो जनः । [6]अपि चैवमस्माभिरुपेक्षिते श्रुतेरपत्यव्यसने ज्ञितकाशिभिः परैः परिक्षतप्रसवा पाक्षतेयी दारिकापि न जाघ्येत, जातापि वा विलुप्येत' इति ।

श्रुतिः—[7]नूनमल्पप्रमाणतया बिभेति परेभ्यो वत्सा काश्यपी ।

आन्वीक्षकी—ततः कोपकपिलकपोला कापिली प्रमितिमभ्युपपद्यमाना मध्ये मार्गमवरुध्य परैः पराभूता न कंचन प्रतिकर्तारं पुरुषमलभत, प्रत्युत विकारमभजत प्रकृतैः ।

श्रुतिः—वत्से आङ्गिरसि, [8]त्वया प्रतिपालितः प्राणिति प्रकृतिदुर्बलो विद्यागणः ।

आन्वीक्षकी—भगवति, त्वदुपजीवनधनाः परपरिमर्दनाय प्रगल्भन्ते परिवारविद्याः ।

---

१. धर्मकीर्तिज्ञानश्रीप्रभृतयो सौगताचार्याः. २. अनुमानव्यियैव शब्दस्य प्रामाण्यम्, न स्वातन्त्र्येणेति वैशेषिकाः. ३. प्रथमं वाक्यार्थगर्भयोग्यताया लिङ्गविशेषणस्यानिर्णयात्र तल्लिङ्गकमनुमानम् । पदान्तुरव्यतिरेकप्रयुक्तान्वयानुभावकत्वरूपा चाकाङ्क्षाशब्दस्य पृथक्प्रामाण्ये सत्येव घटत इति गूढोऽभिसंधिः. ४. शब्दस्यानुमानान्तर्भावेऽनुमानेमप्यलौकिकप्रत्यक्षान्तर्भूतं स्यादित्यभिसंधिः. ५. काश्यपी काणादीसंहिता (वैशेषिकविद्या) द्विप्रमाणा क्षुद्रत्वेनाध्यवसीयते. ६. तथा च भाष्यम्—'सैषा न्वीक्षकी—प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् । आधारः सर्वधर्माणां विद्योद्देशे प्रकीर्तिता ॥' इति.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जडवपुषि शुचित्वमादधाति
प्रतिफलितो मयि ते प्रमाणभावः ।
दलयति तिमिरं निशासु भानो-
स्तुहिनकरप्रतिबिम्बितः प्रकाशः ॥ २८ ॥

श्रुतिः—ततः किमासीत् ।

आन्वीक्षकी—ततः प्रबलतर्कप्रभाकरकरसंपर्ककर्कशाकर्मन्त्रमन्त्रण-मांसला मीमांसा प्रममाथ संभावनाम्, प्रमितिं च परकरादाच्छिद्यात्मसाद-करोत्, अधिकरणप्रसाधनैश्च संचस्कार ।

श्रुतिः—साधु । परपुरुषविद्वेषिणी सतीनामग्रणीरेषा दुहिता जैमिनेः ।

आन्वीक्षकी—संस्कुर्वती प्रमितिमसौ मीमांसा कार्यानुबन्धविधुरा-नस्याः प्रतीकानुपच्छेत्तुमारेभे । तामवारयद्बादरायणी विद्या, भयचकितलो-चनानि च पुराणानि परिपालयांबभूव ।

श्रुतिः—अथ धर्मसंहिताः किमारभन्त ।

आन्वीक्षकी—ताः खलु 'नित्यपुनरुक्तवचनाभिर्युष्माभिः किमिव प्रयोजनम्' इति मीमांसया निर्भर्त्सिताः, 'भवन्ति भवत्योऽपि प्रमाणम्' इति मराश्वासिता धृतिमलभन्त ।

श्रुतिः—ततस्ततः ।

आन्वीक्षकी—अथ पर्यवष्टभ्य माम्, अमी सुगतागमसेनापतयो निर-न्तरमखिलदिङ्मुखेभ्यो निरन्ताभिः शस्त्रवृष्टिभिरनवकाशबद्धमण्डला व्यवाकिरन् । ततश्च

---

१. 'षड्ग्रहाः षडवग्रहाः' इति श्रुतिप्रमाणमूलकमान्वीक्षकीप्रामाण्यमिति भावः. २. प्रभाकरो गुरुः, सूर्यो वा. ३. नाटकपक्षे—करणानि नेत्रादीन्यधिकृत्य प्रसाधनम् । तत्त्वपक्षे—अधिकरणानि न्यायाः. ४. जारो परमात्मा वा. ५. कार्यार्थकलिङादिर-हितानां सिद्धार्थानां न प्रामाण्यमिति प्राभाकराः. ६. ब्रह्मविद्या हि सिद्धार्थानामुपनि-षदां प्रामाण्यं मन्यते. ७. स्मृत्यनुमितेन नित्यप्रच्छन्नेन वेदेन बोधितमष्टकादिविषयकं कार्यं स्मृतयोऽनुवदन्तीति प्राभाकराः । स्मृतिभिर्वाक्यार्थे बोधिते तदाश्वासा-च्छन्नवेदानुमानमिति नैयायिकाः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्योन्यव्यतिघट्टनानलकणाक्रूरः करेभ्यो द्विषां
संहत्यैकपदे पतन्ति परितो याः स्मायुधश्रेणयः ।
बाणैस्तास्तरसेरेणुपुञ्जपदवीमानीय सोऽयं जनो
रक्षामण्डलमात्मनो व्यरचयन्मूमण्डले पांशुभिः ॥ २९ ॥

श्रुतिः—ततस्ततः ।

आन्वीक्षकी—ततः प्रावर्तत तुमुलमायोधनम् । केऽपि तातगोतमप्रयुक्तसूत्रपाशबद्धाः, केचन वत्सवात्स्यायनभाषणतर्जिताः, केचिद्दुद्योतकरवचोविवरणत्रस्ताः, कतिचन वाचस्पतिना प्रसह्य पराभूताः, परे परितः पलायन्त समरभूमेः, उन्मोचिता चाखण्डकलेवरा प्रमितिः । इतः परमादिशतु भवती किमनेन जनेनोपपादनीयमिति ।

श्रुतिः—प्रतिपादय प्रमितिं पुरुषाय ।

आन्वीक्षकी—बाढं प्रतिपादिता, न पुनरेनां श्रद्दधाति पुरुषः ।

श्रुतिः—(स्वगतम् ।) कथं न श्रद्दधाति । भवतु तावदेनम् । (प्रकाशम् ।) वत्से गौतमि, न्यायतनयः परामर्षो यथा युज्यते तया पक्षतया तथा कथः प्रस्तूयताम् ।

(नेपथ्ये ।)

होउ जणाणं हरिसो लहउ पिअं पक्खअं पराभरिसो ।
फिट्टउ मणे अमरिसो पुरिसो ओवग्गसंपअं सहउ ॥ ३० ॥ (क)

आन्वीक्षकी—इदं वादकथायाः पक्षतापरामर्षसंगमप्रतिज्ञावचनमनुदन्ति व्योमचराणि भूतानि ।

(क) भवतु जनानां हर्षो लभतां प्रियां पक्षतां परामर्षः ।
अपैतु मनस्यमर्षः पुरुषोऽपवर्गसंपदं सहतु ॥

१. न्यायवार्तिकं. २. न्यायवार्तिकतात्पर्यटीकाकारेण. ३. अत्र श्रुतिव्यापारो बीजम्, आन्वीक्षकीव्यापार आरम्भः, ताभ्यां प्रथमो मुखसंधिः । स प्रथमेन प्रमितिपुरुषसंगमरूपेण फलेन परिपूर्णः । अथ बिन्दुप्रयत्नाभ्यां प्रतिमुखसंधिरारभ्यते । तत्र 'अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम्' इति लक्षितः श्रुतेरश्रद्धामलक्षालनायानुमितिपुरुषसंगमानुकूलो व्यापारः । तमवतारयति 'न्यायतनयः' इत्यादिना । प्रयत्नस्तु आन्वीक्षकीप्रेरितकथाव्यापार इति ध्येयम्.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रुतिः—बाढम्। अनुमन्यामहे।

शचीव शक्रं गिरिजेव शंकरं निशेव चन्द्रं कमलेव माधवम्।
सरस्वतीव त्रिजगत्पितामहं पातं परामर्षमुपैतु पक्षता॥ ३१॥

(इति निष्क्रान्ताः सर्वे।)

इति श्रवणसंपत्तिर्नाम प्रथमोऽङ्कः।

द्वितीयोऽङ्कः।

(ततः प्रविशति कञ्चुकी।)

कञ्चुकी—जराजर्जरितकलेवरस्य किमीदृशस्य जनस्य जीवितेन।
निर्धौतः पलितेन यद्यपि मुखे कालक्रमात्कालिमा
मोहान्धस्य तथापि मे मसिमसौ लोभः पुनर्लिम्पति।
आनाभेरवलम्बितेन चिबुकं यष्टौ श्रमान्यस्यता
कुब्जेन त्रिपदः पशुः शिशुजनत्रासाय सृष्टो मया॥ ३२॥

(परिक्रम्य।)

भोः, कथयत केदानीं कुमारः परामर्षः।

(प्रविश्य।)

चेटी—अज्ज पडिवन्ध, वन्दामि। (क)

कञ्चुकी—भवति साधनसिद्धे, परिपन्थिभिरप्रधृष्या भव। कथय केदानीं कुमारः।

चेटी—केण कारणेण दुण्डिज्जइ कुमारो। (ख)

कञ्चुकी—भवति, आदिष्टोऽस्मि देवेन न्यायेन—यथा त्वरन्ते मम भावदवाः कुमारपरामर्षपरिमर्षाय। तन्निरूपय साधनसदृशभूमिकासु कतमामधितिष्ठतीति।

(क) आर्य प्रतिबन्ध, वन्दे।

(ख) केन कारणेनान्विष्यते कुमारः।

---

१. न्यायस्य पञ्चभिरवयवैः परामर्षो जन्यत इत्यन्वीक्षासमयः। हेतुभूमिकास्तिस्रः—लिङ्गदर्शनम्, व्याप्तिस्मरणम्, तृतीयलिङ्गपरामर्ष इति.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitized by eGangotri. Funding: MIDF

चेटी—अये क्खु पट्ठमभूमिआ अठविदो वीअ भूमिआरोहणे तुमं पडीच्छइ कुमारो । (क)

कञ्चुकी—ननु त्वमिदानीं क्व प्रस्थितासि ।

चेटी—अज्ज, उक्कण्ठादूमिअस्स कुमारस्स कए बिसिणीदलाइं मुणालिआओ आहरेउम् । (ख)

कञ्चुकी—भवति, किमुत्कण्ठाकारणमायुष्मतः कुमारस्य ।

चेटी—या किर पक्खदा णाम दिव्वदारिआ कुमारस्स पुरदो कहाहिं पत्थुआ आसि, सा एव्व अस्स उक्कण्ठाणिबन्धणम् । (ग)

कञ्चुकी—परामर्षपरिग्रहाय बलवदुत्कण्ठमाना पक्षतापि पक्षद्वारेण प्रविश्य साधनसदनस्य तृतीयां भूमिकामधितिष्ठतीति मम प्रथमा कथा कथयति स्म ।

चेटी—अज्ज, एरिसे परोप्परणिब्भराणुराए केरिसी पक्खदापरामरिसाणं समागमविलम्बो । (घ)

कञ्चुकी—भवति, साधनसदनस्य तृतीयभूमिकामारोहतः परामर्षस्य करावलम्बाय त्वमहं च मिलितौ प्रभवावः । न च परामर्षसविधे तव मम च मेलकं सहन्ते साधनाभासाः । पश्य । मदभिमुखमभिधावत्युपाधिपुरःसरः सव्यभिचारविरुद्धगणः । हन्तुमीहन्ते त्वाममूरसिद्धयः । परामर्षमेष कुण्ठ-

---

(क) मया खलु प्रथमभूमिकास्थापित(?) इव भूमिकारोहणे त्वां प्रतीच्छति कुमारः ।

(ख) आर्य, उत्कण्ठादूनस्य कुमारस्य कृते बिसिनीदलानि मृणालीश्चाहरन्ती ।

(ग) या किल पक्षता नाम दिव्यदारिका कुमारस्य पुरतः कथाभिः प्रस्तुतासीत्, सैवास्योत्कण्ठानिबन्धनम् ।

(घ) आर्य, ईदृशे परस्परनिर्भरानुरागे कीदृशः पक्षतापरामर्शयोः समागमविलम्बः ।

---

१. कथा हि प्रतिपत्तिमुखेन पक्षतामुपपादयति. २. तृतीयलिङ्गपरामर्षे व्याप्तिविशिष्टे पक्षधर्मता भासत इति भावः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Panini Kanya Maha Vidyalaya Collection. Digitized by eGangotri.Funding: MIDF

यितुमुत्कण्ठते प्रकरणसमः। [1]सिद्धिरेषा तिरोधित्सति पक्षताम्। पक्षता-गर्भबाधनाय बाधगणो निर्भरमवतिष्ठते।

चेटी—ता अम्हे अमिलिदा ज्जेव साहेउ भत्तुणो कज्जम्। किं क्खु मिलिदेहिं अम्हेहिं। (क)

कञ्चुकी—ननु मीमांसया मृज्यमाणोऽप्यर्थः प्रतिषिद्धोऽयमान्वीक्षक्या भगवत्या। संघट्टितपरिवारार्पितभरा हि प्रभवो [2]लघुना शरीरेण प्रभवन्ति कृत्येषु, ननु विघटमानपरिजनदुर्गृहीतभारगौरवग्रस्तद्विधाकृतात्मान इति।

चेटी—जत्थ साहणघरुद्देसे तुमं वट्टसि, तत्थ णत्थि मे ओआसोत्ति दुल्लहो तुम्हाणं मेलओ। (ख)

कञ्चुकी—घटयिष्यत्यावामेकत्र प्रदेशे सामान्यलक्षणा नाम दूरदर्शिनी। सर्वथा स्वस्ति नः करिष्यन्त्यान्वीक्षकीप्रेरितास्तर्काः। इत्येहि। साधयावः।

(इति निष्क्रान्तौ।)

इति मिश्रविष्कम्भकः।

(ततः प्रविशति कथा पक्षता च।)

कथा—अयि, कमपि तवान्तरं प्रकारमुपलक्षयामि।

(क) ततो वयममिलिता एव साधयामो भर्तुः कार्यम्। किं खलु मिलिताभ्यामावाभ्याम्।

(ख) यत्र साधनगृहोद्देशे त्वं वर्तसे, तत्र नास्ति मेऽवकाश इति दुर्लभो ऽयावां मेलकः।

---

१. सिद्धिराश्रयासिद्धमन्तर्भवतीति प्राचीनमतेनेदम्. २. अन्यत्र हेतौ पक्षधर्मता, अन्यत्र च व्याप्तिज्ञानमनुमितिहेतुः, ज्ञानद्वयसाधारणी च परामर्षस्य कारणतेति मीमांसकाः. ३. शिशिष्टपरामर्षस्य कारणत्वे शरीरलाघवम्, इतरथा ज्ञानद्वयस्य कारणत्वे गौरवमिति सूच्यते. ४. मेऽस्य एकत्र वर्तमानता. ५. तदेवमनेन विष्कम्भकेण व्याप्तिपक्षधर्मतयोरेकाधिकरण्यग्रहेऽपि पक्षता संभवति. सामान्यलक्षणया सर्वोपसंहारेण व्याप्तिग्रहेऽपि पक्षे साध्यसंबन्धोपहसंभवादिति व्युत्पादितम्. इदानीं कथाव्यापारेणोत्पन्ने तृतीयलिङ्गपरामर्षे पक्षता संघट्ट इत्यङ्केन व्युत्पाद्यते.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

वाष्पायितस्तिमितलोचनमायतैक-
मूदाम चिन्तयसि किंचन काञ्चनाङ्गि ।
स्वेदोदकार्द्रवपुषस्तव रोमहर्षः
शंसत्यसावविरताङ्कुरिताब्विकारान् ॥ १ ॥

पक्षता—भअवइ, तुह पुरओ च्चिअ तह तेण विप्पलम्भएण जणेण अविणअं पाविआ वञ्चिआ अ। किं भणदु मन्दभाइणी ? असेसदो ण्णाद-वुत्तन्ता वि किं पुच्छसि । (क)

कथा—अयि सरले, स्तोकमपि न स्मरामि केनाविनीतेन कथं व-ञ्चितासि ।

पक्षता—अलाहि[1] भअवइ, ण तुए मन्तिस्सम् । तइआ क्खु तं अविणअव्ववसाइणं जणं बलामोडिअ वम्महव्ववहारेसु व्वावारेसि । एण्हिं भणसि ण संभवामि को सो जणो त्ति। (ख)

कथा—अयि, शपामि यदि कोऽपि मया दुर्विनये व्यापारितः । नूनमसि संकल्पेन स्वप्नेन वा कमपि वृत्तान्तव्यतिकरमनुभाविता ।

पक्षता—(चिरमनुध्याय।) ता होज्ज । एसो सविणए विणअहरो वुत्तन्तो । (ग)

(क) भगवति, तव पुरत एव तथा तेन विप्रलम्भकेन जनेनाविनयं प्रापिता वञ्चिता च । किं भणतु मन्दभागिनी । अशेषतो ज्ञातवृत्तान्ता-पि किं पृच्छसि ।

(ख) अलाहि भगवति, न त्वया मन्त्रयिष्ये । तदा खलु तमविनयव्य-वसायिनं जनं बलात्कृत्य मन्मथव्यवहारेषु व्यापारयसि । इदानीं भणसि न संभवामि कः स जन इति ।

(ग) तद्भवेत् । एष स्वप्ने विनयहरो वृत्तान्तः ।

---

१. अलाहिः निवारणार्थः प्राकृतो निपातः. २. एतेन स्वाभिप्रेतदर्शनस्यानुरागप्रकर्षा-वहत्वेन दृढभूमित्वमेतावता प्रबन्धेन सूचितम्.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Panini Kanya Maha Vidyalaya Collection. Digitized by eGangotri.Funding: MIDF

कथा—कथय वत्से, कीदृशीः ।

पक्षता—अज्ज सिविणन्तरे प्पमअवणणलिणीकूल ऽआहरप्पाब्भारे तुह पासे किंपि मन्तअन्तो एसो जणो तुए दिण्णसण्णेण णिहुअमेन्तेण केणवि तक्कालमणहरेण जणेण बलामोडिअ वित्थरन्तेहिं बाहूहिं गहिओ परिचन्तो अ । (क)

कथा—नूनमनेन मया बहुशः प्रस्तुतेन न्यायतनयेनानुवायविशुद्धेन परामर्षेण स्वप्ने संगतासि । स्थाने युवयोरनुरागः ।

पक्षता—भअवइ, विशमाइ दशाइ वट्टामि ।

जइ ठाइ देइ विअणं जइ टुट्टइ झत्ति कट्टए जीअम् ।
सहविसमगाढगेण्ठी कण्ठे वडिओ पणअपासो ॥ ३ ॥ (ख)

कथा—चिरं धारय जीवितम् । अनुभविष्यसि प्रियसमागमम् ।

पक्षता—(संस्कृतमाश्रित्य ।) भगवति, सुचिरविरहबाधादुर्दिने प्रियसंगमसुखा चिरद्यूतधोऽपि न रोचन्ते । पश्य ।

ज्वलति सुलभं चित्रा चन्द्रातपे शलभायितं
दहति सुभगो देहः प्रौढे पुरोपवनानिले ।
विसलयशिलातल्पे शक्यं विपोथयितुं वपुः
दयितविरहव्याधेर्बाधां चिरं सहते जनः ॥ ४ ॥

कथा—ननु चिरकालिकोऽपि प्रियसंगमश्चिरमपत्योत्पत्तिसुखेन परमाभ्युदयाय कल्पते ।

(क) अद्य स्वप्नान्तरे प्रमदवननलिनीकूललतागृहप्राग्भारे तव पार्श्वे किमपि मन्त्रयमाण एष जनस्त्वया दत्तसंज्ञेन निभृतमात्रेण केनापि तत्कालमनोहरेण जनेन बलात्कृत्य विस्तरद्भ्यां बाहुभ्यां गृहीतः परिषक्तश्च ।

(ख) भगवति, विषमायां दशायां वर्ते ।

यदि तिष्ठति ददाति वेदनां यदि त्रुटति झटिति कर्षति जीवम् ।
समविषमगाढग्रन्थि कण्ठे पतितः प्रणयपाशः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

(ततः प्रविशति परामर्षो विदूषकश्च ।)

विदूषकः—एसा सा साहणप्पासाअस्स तइआ भूमिआ । णं आरोहउ पिअवअस्सो । (क)

परामर्षः—वयस्य, रमणीयतमोऽयमुद्देशः । इह हि

ऐक्यं गतासु नभसा स्फटिकाश्मखण्ड-
सोपानपङ्क्तिषु विलोचनवञ्चिकासु ।
व्योम्नि व्रजाम्यहमधोमुखलम्बमान-
च्छायामनुष्यचरणेषु पदानि दत्वा ॥ ५ ॥

अपि च ।

अग्रे चलत्यभिमुखं सहचारिपार्श्वे
पश्चात्पराङ्मुखमधश्च विलम्बमानम् ।
एकस्य मे मणिमयीषु निशान्तसौध-
सोपानभित्तिषु वपुर्बहुतामुपैति ॥ ६ ॥

पक्षता—भअवइ, संवदइ सिविणए सुदस्स सद्दस्स सरसंयोओ । ता जाणे सो ब्विअ भअवइ, पत्थुओ जणो इमं देसमनुसरइ । ता अन्हे कुड्डन्तरिआ ठामो । (ख)

(इति तथा कुरुतः ।)

विदूषकः—णं आसणपरिग्गहं काउण पत्थुअकहासेसं वण्णेदु वअस्सो । (ग)

(इत्युभौ तथा कुरुतः ।)

विदूषकः—तदो का पउत्ती । (घ)

(क) एषा सा साधनप्रासादस्य तृतीया भूमिका । नन्वारोहतु प्रियवयस्यः ।

(ख) भगवति, संवदति स्वप्ने श्रुतस्य शब्दस्य स्वरसंयोगः । तज्जाने स एव भगवति, प्रस्तुतो जन इमं देशमनुसरति । तदावां कुड्यान्तरिते तिष्ठावः ।

(ग) नन्वासनपरिग्रहं कृत्वा प्रस्तुतकथाशेषं वर्णयतु वयस्यः ।

(घ) ततः का प्रवृत्तिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परामर्षः—ततस्तद्दर्शनक्षणमारभ्य

टङ्कोत्कीर्णा त्वचि, विलिखिता नेत्रपत्रे, निषिक्ता
खान्ते, स्यूता वचसि, निचिता पार्श्वतः पृष्ठतश्च ।
धारारूढा हरिति पुरतः काचसङ्घेव काचि-
न्नामाभूत्वा वरतनुरिह प्रायशः प्राविशन्माम् ॥ ७ ॥

पक्षता—(अपवार्य । सासूयम् ।) भअवइ, कए वि गहिअहिअओ एसो जणो । (क)

विदूषकः—वअस्स, तदो तदो । (ख)

परामर्षः—

प्रथमं निपपात या समग्रा
मयि दृष्टिर्वलदम्बुज्ञायताक्ष्याः ।
न चचाल कथंचिदप्यमुष्याः
स्मरबाणैरिव कीलितस्त्रिभागः ॥ ८ ॥

पक्षता—(अपवार्य ।) एव्वं परकलत्तप्पसत्तहिअए अस्सिं जणे तुअ वअणेण णिहितचिन्ताए मम णवर मरणं जेव्व परिणअम् । (ग)

कथा—अविदितकथाशेषा किमुत्ताम्यसि ।

विदूषकः—वअस्स, तस्सिं अवसरे तए किं पि किअं भणिअं वा । (घ)

परामर्षः—वयस्य,

स्तम्भेन कर्मणि तनोः स्थगितेऽपि काम-
काष्ठां परामधिरुरोहतसं वरोरुः ।

(क) भगवति, कयापि गृहीतहृदय एष जनः ।

(ख) वयस्य, ततस्ततः ।

(ग) एवं परकलत्रप्रसक्तहृदयेऽस्मिञ्जने तव वचनेन निर्हितचिन्तायां मम केवलं मरणमेव परिणतम् ।

(घ) वयस्य, तस्मिन्नवसरे तया किमपि कृतं भणितं वा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

गद्गदेन यदपि गलपिता तथापि
वाचामगोचरमवोचत लोचनान्तः ॥ ९ ॥

पक्षता—(अपवार्य।) भअवइ, पणिवडामि तुह पाआणम्। एरिसदुव्विणीअजणगहिअहिअआ क्खणं पि ण जीविउं महेमि। अणुमण्णस्व मम्। परिच्चइस्सं दाव इदं सरीरम्। दुल्लहो क्खु इमस्सिं जम्मस्सिं परकलत्तप्पसत्तहिअओ जणो। (क)

विदूषकः—तदो। (ख)

परामर्षः—ततश्च

कथाकथितरूपानुरूपामेनां विलोकयन्।
प्रभातमङ्गलध्वानैर्धिग्जनोऽयमजागरीत् ॥ १० ॥

कथा—अयि चपले, शृणु तावत्त्वामाश्रित्य निशास्वप्नवृत्तान्तमुदाहरत्यायुष्मान्परामर्षः।

पक्षता—(अपवार्य।) भअवइ, एण्हिं विपरिणओ मे संसारो। येहिं सुव्वन्तेहिं आसिं दद्धा हिमेण भिसिणि व्व निव्वावअन्ति ते व्विअ पिअवअणा मं संभविज्जन्ता। (ग)

परामर्षः—वयस्य, अवलम्बस्व माम्। तिरयति चेतनां प्रियजनकथाप्रसङ्गोत्थितो मोहः। (इति मूर्छति।)

कथा—संप्रति सांप्रतं तवोपसर्तुम्। (इति पक्षतामाकर्षति।)

(क) भगवति, प्रणिपतामि तव पादयोः। ईदृशदुर्विनीतजनगृहीतहृदयां क्षणमपि न जीवितुमिच्छामि। अनुमन्यस्व माम्। परित्यक्ष्यामि तावदेतच्छरीरम्। दुर्लभः खल्वस्मिञ्जन्मनि परकलत्रप्रसक्तहृदयो जनः।

(ख) ततः।

(ग) भगवति, इदानीं विपरिणतो मे संसारः। यैः श्रूयमाणैरासन्दग्धा हिमेन बिसिनीव संजीवयन्ति तान्येव प्रियवचनानि मां स्मर्यमाणानि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पक्षता—(उपसृत्य परामर्षस्य ललाटे हस्तं दत्वा।) बुज्झस्व महाभाअ, ण जुज्जदि ते मोहो। (क)

परामर्षः—(संज्ञां लब्ध्वा।) भगवति, नमस्ते। स्वागतमस्मै नूतनातिथये जनाय।

कथा—अद्य भगवतीभ्यां श्रुत्यान्वीक्षकीभ्यामदिष्टया मया सकलवाङ्मयसाम्राज्यसुभगस्य स्वीकृतप्रमाणसमवायस्य न्यायस्य प्रथमपुत्राय गोतमगोत्राय तुभ्यमयोनिजन्मा संशयानुमित्सयोरपत्यकृतिका पक्षता नाम कन्यका प्रतिपाद्यते[1]।

परामर्षः—स्वस्ति। प्रतिगृहीतोऽयमार्याप्रसादः।

विदूषकः—कथं वह्मणो इमो न परमण्णं भोजिओ ण सोत्थिवाअणं पडिवादिओ। (ख)

(सर्वे स्मयन्ते।)

(नेपथ्ये कलकलः।)

विदूषकः—कीस एसो कप्पन्तघडन्तघणघडाघोरणिग्घोसघग्घरभीसणो धरणिभारुद्धरणुद्धुरमहावराहघोणाघुरीघुग्घुराइअगहिओ वहिरिअसअलजीअलोओ लोआलोअन्तमहिवेट्ठणभइरओ दुन्दुही ताडीअदि। (ग)

कथा—ननु समासन्नमिदमुदग्रसर्वाङ्गदुर्वारतरं चार्वाकबलम्। पश्य।

माद्यद्दर्पान्धगन्धद्विपघटितघटाबन्धमास्कन्द्य बन्ध-
प्रेङ्खत्पर्याणपर्याकुलतुरगबलक्रुष्टहेषाविशेषम्।
एतत्सूतप्रतोदाहतहयचलितस्यन्दनोद्धातधाटी-
धावत्पादातपादक्षुभितगति समभ्येति पारक्यचक्रम्॥ ११॥

(क) बुध्यस्व महाभाग, न युज्यते ते मोहः।

(ख) कथं ब्राह्मणोऽयं न परमान्नं भोजितो न स्वस्तिवादनं प्रतिपादितः।

(ग) किमित्येष कल्पान्तघटमानघनघटाघोरनिर्घोषघर्घरभीषणः धरणिभारोद्धरणोद्धुरमहावराहघोणाघुरीघुर्घुरायितगभीरो वधिरितसकलजीवलोको लोकालोकान्तमहीवेष्टनभरितभैरवो दुन्दुभिः ताड्यते।

---

१. सर्वाणि प्रमाणानि छायया महावाक्ये समवयन्तीति भाष्ये स्थितम्.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitized by eGangotri. Funding: MIDF

परामर्षः—(निरूप्य । सहर्षम् ।) तथा निमित्तानि सूचयन्ति यदचिरेण नश्यत्यसौ सेनेति । पश्य ।

ऊर्ध्वं धावन्ति मूर्धस्खलितभटशिरस्त्राणनिष्पिष्टशस्त्र-
श्रेणीसंसर्गदूरज्वलदहनकणप्लुष्यमाणीः पताकाः ।
उत्पातोल्कानिपातव्यतिकरवशतो विप्लवागावर्तमाना
निर्मान्ति भ्रान्तियोगादपरमिव रवेरम्बरे बिम्बवर्गम् ॥ १२ ॥

पक्षतौ—को क्खु एसो सरअचन्दचन्दिआसोहणसरीरेण तुवएण परबलाहिमुहं पअट्टो । (क)

कथा—नूनमसौ न्यायनिबन्धप्रणेता विद्वानुदयनो निर्दयं प्लवेषु प्रहर्तुमभिधावति । (निरूप्य ।) अहो न्यायविद्वदुदयनाधिष्ठितस्य शीतकरश्वेतस्याश्वस्य प्लुतगतिपाटवम् ।

क्ष्माप्रष्ठे क्षुरलक्षणेन पदवीमालिक्ष्य शिक्षां गतैः
काङ्क्षन्तोऽनुसरन्ति धूलिमलिना दूरादमी वायवः ।
तस्मालोचनवञ्चनोऽयमवनौ पादं न दत्ते प्लुतै-
र्बिम्बार्धाङ्कपरम्परामिव लिखत्याकाशभित्तौ हयः ॥ १३ ॥

अपि च ।

काष्ठान्तसंघटितदूरविलम्बमान-
मार्तण्डरश्मिवलयानवलम्बमानः ।
गामस्पृशन्नपि दधन्नतिमुन्नतिं च
हिन्दोलयेव तुरगो रमते प्लुतेषु ॥ १४ ॥

परामर्षः—अहो धावितलाघवमुदयनहयस्य ।

विच्छिन्नामनुनैव यावदवनौ भानुः प्रभां पातये-
त्प्राक्स्तावदयं रयेण तुरगो गव्यूतिमुल्लङ्घते ।

(क) कः खल्वेष शरच्चन्द्रचन्द्रिकाशोभनशरीरेण तुरगेण परबलाभिमुखं प्रवृत्तः ।

---

११. वेगेन.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रामीणा जनता नितान्तचकिता दूराञ्चिते चक्षुषी
निक्षिप्य क्षणमीक्षते पथि हयच्छायामयीं विद्युतम् ॥ १५ ॥

अपि चायमुदयनः

असुगा हयवेगेन क्षणेनोत्तीर्णाध्वविस्तरः ।
समभिव्याहृतं वेत्ति नानाजनपदाक्षरम् ॥ १६ ॥

आश्चर्यम् ।

यो वेगतो गतो दूरमध्वानमुदलङ्घत ।
पश्चादनुसरत्येषा हेषा तस्यैव वाजिनः ॥ १७ ॥

कथा—कथमगणयित्वा शस्त्रवृष्टिमेष
उदयनतुषारधामा लोकं सहजं निजं परित्यज्य ।
प्रविशति परचक्रविं प्रतिपदमनुवृद्धये कलाराशेः ॥ १८ ॥

परामर्षः—परितः पतदस्त्रवर्षमिषुधारया वारयन्नयमुदयनो हयरय-वशात्तथाभ्रमणिलामातनोति यथा

भूमौ पुरङ्गममयं गगने मुखेन्दु-
ज्योत्स्नामयं नतधनुर्मयमन्तराले ।
अश्वासु सायकमयं तदिति क्रमेण
चत्वारि चक्षुषि चकासति मण्डलानि ॥ १९ ॥

कथा—इमौ किल कुमारिलप्रभाकरौ परान्पराभवन्तमुदयनमनुसृत्य मन्त्रयेते—'भ्रातरुदयन, किमात्मानमायासयसि । हरन्तु पक्षतां किल खण्डयन्तु परे परामर्षम् । ननु द्विधाविभक्ततनुरप्यसौ पक्षतया धर्मदारैर्विनापि प्रभवति जनयितुमयोनिजां निजामनुमितिम्' इति ।

पक्षता—अहो कुडिलत्तणमिमाणम् । (क)

(क) अहो कुटिलत्वमनयोः ।

१. 'शेषः' इति पाठः. २. ज्ञानद्वयमनुमितिजनकम्, न तु 'पक्षतेति मीमांसकमतम्.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विदूषकः—भअवइ, भआमि इस्सासुं । तदो पक्खदं कत्थ अवाहिए स्थले ठवेसि । (क) (इति पक्षतया सह निष्क्रान्तः ।)

परामर्षः—इमौ कुमारिलप्रभाकरौ स्मितपूर्वमुदयनेनावधीरितौ कोपकपिलाननौ भूत्वा स्वां सदारं शपतः—

'गर्भं धत्तां परामर्षसंनिकर्षेण पक्षता ।
अपत्ये जातमात्रे तु दम्पती न भविष्यतः[1] ॥ २० ॥

कथा—अहो दुराचारयोरनयोर्दारुणानि दुरन्तवचनानि ।

परामर्षः—भगवति, तथाविधापत्यवदनदर्शनकृतार्थयोरावयोः क्षणमात्रमपि प्राणनं परमनिःश्रेयसाय ।

(नेपथ्ये कलकलः ।)

कथा—हा, किमेतत् । जगदवसीनदिवसोदित्वरदिवाकरप्रकरकरचक्रनिष्कथनकदर्थितमिव युगविगमवर्धमानवडवावीतिहोत्रहेतिलिह्यमानमिव धूर्जटिललाटलोचनपुटपच्यमानमिव जनजातमुकाण्डचण्डिमापन्नोष्मोष्मणा कृच्छ्रं प्राणिति । (प्रणिधाय ।) नूनमुदयनेन परेषां क्षुद्राणामुपद्रवमसहमानेनोदीरितमिदमाग्नेयमस्त्रम् ।

परामर्षः—अहो, दहनक्रियालाघवमुदयनोदीरिताग्नेयशस्त्रानलस्य । तथा हि ।

सेनेति धूमपटलीति हुताशवीथी-
त्यङ्गाररजिरिति भस्मपरम्परेति ।
दृष्टिर्विचित्रमतिमादधती विहाय
वस्तुक्रमं युगपदुल्लिखति प्रकारान् ॥ २१ ॥

(क) भगवति, बिभेम्याभ्याम् । ततः पक्षतां क्वचिदप्यबाधिते स्थले स्थापयामि ।

---

१. अनुमितौ जातायां लिङ्गभावस्वरूपा पक्षता तिरोभवति, ततः परामर्षो नश्यतीति भावः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(नेपथ्ये।)

अरे दुरात्मन्, अयं न भवसि।

कथा—अयमसावुदयनेन दग्धे सकलकले समरमवतरन्नेक एव

लार्ल्लकाणां सार्वभौमः समग्रा-
मुर्वीं क्रामन्नर्वता कर्वुरेण।
सर्वैर्वन्द्यैर्निकृमैर्वीरवर्गै
खर्वीकुर्वन्नेति दुर्वारगर्वः॥ २२॥

परामर्षः—हा, कथमापतन्नेव चार्वाकवीरोऽयमुदयनकरनुन्नशरभिन्न-वर्मा[1] प्राणानपहाय पतितः।

खलः पाटच्चरीं वृत्तिमवसानेऽपि नोज्झति।
असावसूनां व्रजतामादत्ते पञ्चताधनम्॥ २३॥

कथा—श्लाघनीयोऽयमीदृशः शूरस्य प्रतिशूरशरशीर्णस्य शरीरक्षयः। तथा हि।

उच्चैरुद्भूयमाने क्षरदसृगुदके पक्षपालीजलार्द्रा-
स्तोमे स्तोमावदातद्युतिभृति यशसा तायमाने विताने।
चार्वाकोर्वीभुजङ्गः समरभुवमसौ संविभक्तानुरागा-
मङ्गैनालिङ्ग्य निद्रां निरवधिमधुना सेवते वीरतल्पे॥ २४॥

परामर्षः—भगवति, जानामि चार्वाकमपहाय सांप्रतमुदयनमसौ विश्वंभरा कामयते।

कथा—एवंविधप्रकृतिरेव कुलपांशुला काश्यपी कस्य परिचयं प्रणाणयति।

पश्यैषा नरकप्रसूर्वसुमती गर्जद्गजग्रामणी-
पर्जन्यच्युतदानवारिसमरप्रावृण्णिशीथे पुनः।
बद्धाश्लेषमपास्य वीरशयने निद्रान्तमेकं पतिं
को जानात्वभिसृत्य गच्छति कया गत्या परं क्रामुकम्॥२५॥

---

१. 'मर्मा' इति पाठः. २. 'गृध्रैः' इति पाठः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परामर्षः—क एष नाम न्यायाचार्यमुदयनं मूलराज्येऽभिषिञ्चति।

कथा—एष परिशिष्टप्रकाशकवयिता बुधो वर्धमानः। तं किल चार्वाकस्य बन्धुरतिनृशंसः सोमसिद्धान्तः समरायाह्वयते।

परामर्षः—हन्त, आहूतकुपितो वर्धमानो मण्डलाग्रमुद्यम्य सोमसिद्धान्तमभिधावति।

कथा—वत्स, पश्य।

स्कन्धे व्यापारयन्नस्य कृपाणमुपवीतवत्।
वर्धमानो द्विजवरः संस्करोतीव वैरिणम्॥ २६॥

परामर्षः—नूनमसावस्य पाखण्डाखण्डलस्य

कण्ठे गृह्णाति, वक्षो विमृशति, वलते पार्श्वतो, मध्यभागे
श्लिष्यत्यूरुं रुणद्धि प्रणिपतति पदे वर्धमानास्त्रिवल्ली।
इत्थं व्यक्तानुरागाप्यनुनयविमुखे सोमतन्त्रस्य पत्न्या-
वुत्पत्य स्वर्वधूटी प्रणयिनि धरणौ लज्जया मज्जतीयम्॥ २७॥

अपि च।

प्रौढच्छेदोच्छलितो व्योमगतः सोमतन्त्रकायार्धः।
रूढैकबाहुराहुभ्रान्त्या मिहिरं विभीषयति॥ २८॥

कथा—दृढासिप्रहारपतिते सोमसिद्धान्ते कापालिकनीललोहितमहाभैरवभूतडामरोमामहेश्वरादयो रणादपक्रान्ताः। वत्स परामर्ष, जातं निष्कण्टकम्। एते च (?) प्रतिबन्धसाधनसिद्धिभ्यां प्रतिसंस्कृताः कार्यायोजनधृतिसंहृतिपदप्रत्ययप्रभृतयः साधनप्रासादप्रदेशाः। तेषु पक्षतया सह विहरमाणो जनयिष्यसि भगवतीमनुमितिम्। अनया च संघटितः पुरुषः प्राप्स्यति सिद्धिमिति। प्रवर्तते चेयमुत्तमचामीकरदेवनिकरैरिवाम्बरपरभागमापूरयन्ती पितृप्रसूः।

---

१. कुसुमाञ्जलिप्रकाशः. २. बौद्धाधिकारटीकायां वादिविनोदे च शंकरमिश्रचरणैरुक्तम्—'सोमसिद्धान्तोऽपि पार्वीकरीत्या संगमनीयः' इति. ३. एते सोमसिद्धान्ताचार्याः. ४. प्रतिबन्धो व्याप्तिः, साधनसिद्धिः पक्षधर्मता, कार्यायोजनं धृतिरित्यादीनि भगवत्साधकानि लिङ्गानि कुसुमाञ्जलौ प्रसिद्धानि.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitized by eGangotri.Funding: MIDF

यदपि सृजति पूर्ववत्र तापं
समयवशेन विलीनपश्चिमार्धः।
अवतारसमलीमसं तथापि
त्यजति न रागसमागमं पतङ्गः॥ २२॥

(इति निष्क्रान्ताः सर्वे।)

इति मननसिद्धिर्नाम द्वितीयोऽङ्कः।

तृतीयोऽङ्कः।

(ततः प्रविशति श्रद्धा निर्वेदश्च।)

निर्वेदः—हन्त हन्त, विभ्रति विश्वमदभ्रवैभवे भगवति विश्वंभरे कमन्यमाश्रयाम्यगाधगर्धगदगृहीतः। तेन हि।

जहिहि तरलां लक्ष्मीमेतां त्यजामरपादपा-
न्हृदयहतया किं ते चिन्तामणेरपि चिन्तया।
जठरदहनज्वालाशान्त्यै यदि स्युरमी तदा
स्वपितुरुदधेरौर्वे निर्वापयेयुरुषर्बुधः॥ १॥

श्रद्धा—वत्स, ज्वलितं जगज्जीवितमनेन तृष्णाज्वरैर्जनं जरयता

---

१. पताकास्थानके श्लेषः समासोक्तिः साधारणधर्मोपन्यासश्चेति त्रयः सकाराः. तत्र यदपीत्यादिसमासोक्त्या पतङ्गपदोपात्तस्य तीर(?)स्य श्रवणमननसिद्धावपि परोक्षाभ्यथेन परोक्षस्यैव दोषत्रैराश्यस्य हानिः, तत्प्रयुक्ता कियतां क्लेशानां हानिः सिध्यति, तदप्यपरोक्षमोहजनितो रागादिर्न विरमतीति साक्षात्कारसिद्धये तृतीयाङ्कारम्भ इति विन्दुरपि सूचितः. २. श्रवणमननाभ्यां संसारविषयकालं प्रलयरूपस्य आत्मावमान्रूपस्य वा निर्वेदस्य दृढभूमिकता स एव विवेकः. विवेकिनस्त्वायतिमालोचयन्तः संसारसुखमपि 'कुपितफणिफणामण्डलच्छायप्रतिरूपमित्यपजहतीति टीकादर्शनात् निर्वेददृढभूमिके सति श्रद्धा विविदिषां साक्षात्चिकीर्षां प्रसूते. तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति—'यज्ञेन दानेन तपसानाशकेन' इति श्रुतेः. विविदिषाव्यापारितपुरुषो निदिध्यासनादौ प्रवर्तते. सेयं निदिध्यासनपूर्वारम्भा विष्कम्भकेण प्रस्तूयते. ३. गर्धो नाम विषयबुभुक्षा। सा द्विधा—तृष्णा काम इति। तत्राप्यगर्धान्निर्विद्यते—'तेन हि' इत्यादि. ४. जीवता गर्धो न परिहर्तुं शक्यते. स हि सर्वजनस्य जठरानलसाध्यः, स चाजीवनमनुवर्तते इति श्रद्धया आक्षेपः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दुर्जातेन जठरजातवेदसा ।[1] न जातु कोऽपि जन्तुरनेनानभिजातेनागोचरीकृतो जीवति । पश्य ।

का मैत्री मरुता समं हुतभुजो भौमस्य यद्वाह्वना
स्पृष्टः प्रज्वलति प्रतीपवलनां धत्ते च वैश्वानरः ।
तथ्यं प्राणसमीरकोष्ठशिखिनोः सख्यं यतस्ताविमौ
विश्वेषामुदरं सहैव विशतः काले सहोत्कामतः ॥ २ ॥[2]

किंच महदनादरबीजमिदम्, यदकिंचनता नाम, यया गृहीतो धनोपायमनुसरन्नवगृह्यते जनः । पश्य ।

कन्यारत्नं हयपरिवृढं नागराजं मणीनां
श्रेष्ठं दत्वा विबुधपरिषत्तोषिता सागरेण ।
धिग्दारिद्र्यं परिभवपदं यस्य दोषात्पुरारेः
मूर्ध्नि क्षिप्तो विबुधविघसग्रासपिण्डस्य खण्डः ॥ ३ ॥[3]

निर्वेदः—जननि, गर्ध एव गर्हामूलममुष्य, न पुनरकिंचनता । तथा हि[4]।

जातिं विहाय कनके रमते पशूनां
भर्ता बिभर्ति शिरसा कृपणः कपर्दम् ।
राजेति वक्रशशिनं तिलकीकरोति
तस्मादसौ परिभवास्पदमीश्वरोऽपि ॥ ४ ॥[5]

श्रद्धा—वत्स, न तथा किमपीतरद्वस्तुगर्धगोचरो यथा स्त्रियो नाम[6]।

निर्वेदः—शान्तम् । अविषयो विदुषामभिलाषस्य मानुष्राणः[7]। विशेषतस्तु

---

१. तव दारिद्र्यदुःखपरिहाराय धनगर्धापि न परिहर्तुं शक्यते इति भावः. २. चन्द्रस्य. ३. प्राणित्रामात्रगोचरो गर्धो यावज्जीवमवतिष्ठत इति वक्तुम्. तथाप्यधिकधनगर्धः सुपरिहरः, स एव च परिभवायेत्याह—'जननि' इति. ४. उन्मत्तकुसुमे मालतीं विहाय मोदते. पक्षे—जातिव्यवहारमुल्लङ्घ्यापि सुवर्णार्जने यतते. कपर्दं जटाजूटं वराटकं वा. राजते चन्द्रमसो नाम. ५. कामं निन्दितुं प्रस्तौति. ६. 'अनुरागस्य' इति पाठः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशुचिवपुषामेषां मध्येऽप्यमेध्यतमाः स्त्रियः
क्वचिदपि न हि श्रौते कर्मण्यमूरधिकुर्वते ।
विगलदसृजःपूयग्रन्थिप्ररूढदुरुद्धर-
द्विष्टदकृमयो नित्यं यासां गलन्त्यधरव्रणाः ॥ ५ ॥

श्रद्धा—वत्स, प्रबलयोरनयोर्गर्धकामयोर्विरामाय किमपि यतते श्रुतिः।

निर्वेदः—मातः, तदभिसंधाय दुहितरं प्रमितिमर्पयति स्म पुरुषाय ।

श्रद्धा—वत्स निर्वेद, जानासि पुरुषमाश्रित्य वर्तते श्रौती प्रमितिः ।

निर्वेदः—परैः प्रसह्यापहृतामपि प्रमितिमान्वीक्षकी प्रत्याहृत्य पुरुषसादकरोत् । परं तु

परबलपरिमर्दायासतान्तां[1] नितान्तं
पुरुषमुपगतान्तां कापि शङ्का पिशाची ।
अविशदवशमस्या येन सर्वं शरीरं
प्रभवति न कथंचित्कर्मणः साधनाय ॥ ६ ॥
पिशाचावेशविवशां प्रमितिं तनयां श्रुतेः ।
न श्रद्दधाति पुरुषः प्रमाणयतु तां कुतः ॥ ७ ॥

पठति चायमतिमात्रप्रवृद्धमहामोहः पुरुषो दुरक्षराणि ।

'अपरिचिततातजन्मा श्रुतिरभिजातिं न चेद्भजते ।
कथमनभिजातवंश्यां प्रमितिं पुरुषः प्रमाणयतु ॥ ८ ॥'

इति ।

श्रद्धा—ततस्ततः ।

निर्वेदः—ततो भगवती श्रुतिरान्वीक्षकीमादिष्टवती—'घटय पक्षतया परामर्षम्। प्रभवति हि दुर्घटघटने त्वदनुशिष्टानां कथानां प्रथमा' इति।

श्रद्धा—तत्किं घटितः पक्षतया परामर्षः ।

निर्वेदः—न केवलं घटितो, यावदनुमितिं नाम कन्यकामजनयत् । तामिमां[2] दारिकाम्, अन्तःकरणाय बादरायणी, बुद्धिसत्त्वाय कापिली,

---

१. 'तान्तं' इति पाठः. २. अनुमितिरन्तःकरणस्य वृत्तिरित्यौपनिषदाः. प्रकृतिपरिणामस्य बुद्धिसत्त्वस्य महत्त्वे नामेति सांख्ययोगौ. प्रवृत्तिविज्ञानसंततावन्तर्भूतेयमालयविज्ञानसंततौ समवैतीति सौगताः. पुरुषाणामेवासौ गुण इति नैयायिकादयः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चिदालथ्यसंतानीय सौगतीसंहिता दातुमारभते। गौतमी काणादी जैमिनीया च पुरुषसात्कर्तुमीहन्ते।

श्रद्धा—अपि नाम सिद्ध्यै संपद्येत पुरुषानुमित्योः संगतम्।

(प्रविश्य)

विविदिषा—भगवति श्रद्धे, पुरुषस्त्वां द्रष्टुमिच्छति।

श्रद्धा—पुरुषः प्रथमं तथाभजमानामपि मां निराकरोत्। अधुनैव मम केन हेतुना वदनालोकनमीहते शठः।

विविदिषा—भगवति, सांप्रतमनुमित्या सह संगतः पुरुषस्तस्या जल्पितेन बोधितः श्रौतीं प्रमितिं भवतीं च बहु मन्यते। शशाम्बु किलानुमितिजल्पितेन श्रौतप्रमितेः पिशाचावेशः, पुरुषस्य च श्रुतावनभिजातश्रमः।

श्रद्धा—कथय कीदृशमनुमितिजल्पितम्।

विविदिषा—एवमाह पुरुषसंगतानुमितिः—

'भुवनघटनभङ्गौ निर्मिमाणस्य यस्य
प्रभवति परमाणुप्रेरणाय प्रयत्नः।
परिणतिहितहेतौ विश्ववृत्तिं विधत्ते
विधिवचनविधातुस्तस्य पुंसो नियोगः॥ ९॥

अपि च।

यस्य त्रैगुण्यशक्तिद्रढिमभरवतः सिद्धिलिङ्गानि कार्यं
वाक्यं संख्याविशेषश्रुतिपदधृतयः प्रत्ययायोजने च।
कर्ता कार्यस्य धर्ता भुवननिगमयोः संप्रदायप्रवक्ता
विश्वस्याश्वासमूलं स जयति पुरुषश्चेतनाराशिरेकः॥ १०॥

---

१. यज्ञादौ विश्वस्य प्रवृत्तिम्. २. ज्ञानेच्छाप्रयत्नाः. ३. कार्यं जन्यभावः संख्याविशेषः, सर्गाद्यकालपरमाण्वादिसंख्यापदं व्यवहारः, धृतिर्ब्रह्माण्डादेः प्रलय आश्वासः, आयोजनं परमाण्वादिषु आरम्भजनकं सर्गाद्यकालीनं कर्म। अथ वा कार्यं विधिरत्नाभिप्रायः। विधिरेव तात्पर्यभं इव श्रुतिकुमार्याः पुंयोगे प्रमाणमिति सर्वं कुसुमाञ्जलावनुसंधेयम्.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रद्धा—घटितः प्रमित्यानुमित्या च पुरुषः। सांप्रतमवसरोऽस्य सिद्धिसंगमाय।

निर्वेदः—भगवति, भगवान्पतञ्जलिः संयमदुहितुः सिद्धेः पुरुषसंगमाय व्यवस्यति।

विविदिषा—भगवति श्रद्धे, सखे निर्वेद, सर्वे वयमुपसर्पाम पुरुषम्।

(इति निष्क्रान्ताः सर्वे।)

इति विष्कम्भकः।

(ततः प्रविशति पतञ्जलिः।)

पतञ्जलिः—प्रसादयति बुद्धिवृद्धिमसौ चतुर्दशो निशामुहूर्तः।

परिणतनिशाकेशस्तोमे प्रभापलितोन्मुखे
भजति तमसश्चक्रे चक्रीवदङ्गपिशङ्गताम्।
अपगतगुणद्वन्द्वासत्त्वे स्थिता समयक्रमा-
न्मलिनविषयाकारस्पर्शं विमुञ्चति चेतना॥ ११॥

(निरूप्य।) ऊनमवसानदशायां वर्तते विभावरीतुरीययामः।

निर्वान्त्यः पुनरुद्भवन्ति भवने प्रातःप्रदीपत्विषः
प्रान्तेभ्यो मुहुरन्तरं विविशते निर्याति चान्धंतमः।
औदर्यानलमान्द्यदोषशमनीमासेवमानः क्रियां
सौधो धूममिव प्रणालनलकैः पीत्वायमुन्मुञ्चति॥ १२॥

अपि च।

सौधस्य प्रतिफलितं निकुञ्जगर्भे-
ष्वभ्यूर्णोन्मिषितकपोतनादपुष्टम्।
एकस्याप्यनुगुणने कृतोद्यमस्य
स्वाध्यायध्वनितमनेकधा विभाति॥ १३॥

---

१. उपनायकः पुरुषः। तदिति वृत्तं प्रासङ्गिकं व्यापकं च पताकेत्युच्यते। पताकाप्रार्थ्याशायोगाद्गर्भसंधिः। प्राप्त्याशा तु मुहुर्विघ्नैः प्रतिहन्यमानः फलानुकूलो व्यापारः प्रादेशिकमितिवृत्तम्। प्रकरो यथा रामचरिते श्रावणवृत्तान्तः। तथेह पतञ्जलिव्यापारः। स चेह नियतासिसंवलितो विमर्षसंधिरित्यादि यथायथमनुसंधेयम्.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitized by eGangotri. Funding: MIDF

(नेपथ्ये ।)

नाथ, कथमुपेक्षसे ।

क्व जगति कत्तुमाहिकस्य हेतो-
रहमिह बद्ध इति त्वमेव वेत्थ ।
स्वमपि यदि न चेतये न च त्वां
मम करुणामय तत्र कोऽपराधः ॥ १४ ॥

पतञ्जलिः—अहह, करुणानि चिरात्प्राप्तचेतनस्य पुरुषस्य पुरुषोत्तमं प्रति परिदेवितवचनानि ।

(पुनर्नेपथ्ये ।)

हन्त भोः,

अविदितगतिना प्रमादनिद्रा-
मुषितमतिः किल व त्वयास्मि बद्धः ।
कथमिव मम दृष्टिवर्त्मवर्ती
भवपथतस्कर बन्धने प्रभुः स्याः ॥ १५ ॥

पतञ्जलिः—हन्त, पुरुषस्य परममात्मानं दिदृक्षमाणस्य भगवन्तं प्रति बलवदेतान्युपालम्भाक्षराणि ।

(नेपथ्ये ।)

अये, आयतुमायकिमायासयसि दीनजनम् ।
किं तव तव वशे ममेन्द्रियाणि
श्रुतिविषयावधिवर्तमानदृष्टेः ।

---

१. अन्योऽपि हि कारागारप्रसूतो दस्युदारकादिर्बन्धकर्तारमात्मानं च न परिचिनोति, न चायमपराध्यति पित्रोरपराधादिनेति मोचयितुमेवोचितः. २. अविदितेति । गतिर्विचेष्टितुम्, पदसंचारो वा । तथा च निभृतपदमागत्य तस्करेण निद्रादशायां बद्धस्य जाग्रद्दशायामभिमुखागतप्रतिभटनिवारणटोः पथिकस्य वृत्तान्तो ध्वननगम्यो भगवद्बद्धपुरुषवृत्तान्ते तादात्म्येनाध्यारोपितः—इति गुणीभूतव्यङ्ग्यतावृत्तान्तयोः, उपमाध्वनिर्वा. ३. दृश्यन्ते हि तव निवर्तनाभिप्रायेण प्रवर्तनादयः कूटव्यवहाराः. ४. न हि त्वदर्शनात् परतो भवाध्वनिकोऽपि सर्तुं क्षमते. ५. त्वदर्शिनां त्वद्व्यापारेणापि बन्धो न संभवतीति भावः. ६. तव सन्निहितप्रपञ्चतया कितवत्वम् । जगदपक्रमकारणत्वाच्च भुक्तत्वम् । जगतो मुखमसि चेत् सुतरां ममेति । तव हृषीकेशस्य वशे सर्वेन्द्रियाणि त्वद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुखमसि जगतो न वेद्मि दृष्टौ
त्वमवतरिष्यसि केन दर्पणेन ॥ १६ ॥

पतञ्जलिः—नूनमसौ विविदिषया गाढमुपगूढः पुरुषो निर्विद्य परमात्मदर्शनोपायमनुसरति ।

(नेपथ्ये ।)

हन्त, सांप्रतमायासनिःसहोऽस्मि ।
बहुविध भवभूमिकाभिरामि-
र्नटयसि नाथ यथा तथा नटामि ।
कृपण गमयिता भवानविद्या-
जमनिकयान्तरितः कियन्त्यहानि ॥ १७ ॥

पतञ्जलिः—हन्त, द्रवयन्ति मम चित्तवृत्तिमेतानि विविदिषतः पुरुषस्य निर्वेदोपबृंहितानि परिदेवितानि । तत्संघटयामि सिद्धिममुना[2] । तया सह पश्यतु परमात्मानम् । कः कोऽत्र भोः ।

(प्रविश्य ।)

वटुः—उपाध्याय, शाण्डिल्यो जाबालिरभिवादये ।

पतञ्जलिः—वत्स, स्फुरतु ते परं चापरं च ब्रह्म । आयुष्मन्, निरुध्यन्तामन्तरायभूताश्चित्तवृत्तयः[3] । पुरुषसंगमाय सिद्धिमभिसारयतु महाव्रतनामा मम कञ्चुकी ।

धिष्ठितान्येव प्रवर्तन्ते । मुखे च घ्राणरसनचक्षुःश्रोत्राण्यन्तर्भवन्ति । तव दृष्टिर्वैदेकविषयधर्माधर्मपर्यन्तं प्रवर्तते । मुखस्यापि दीर्घा दृष्टिः श्रवणदेशावधि तिष्ठति । स्वमुखं च स्वयं दर्पणं विना न दृश्यते, त्वमपि निर्विकल्पसमाधिमुकुरप्रतिफलितो दृष्टिपथमवतरिष्यसि । तदुपायोऽधुना जिज्ञासित इति समुदायार्थः.

१. अत्र, नृत्तावसानपारितोषिकार्पणभीत्या 'नाटकपरिसमापयतः' इत्यन्तरप्रसादयाचनभयादन्तर्धाय निरीक्षमाणेन कुतुकिना कृपणेन प्रभुना चिरमनेकभूमिकाभिर्निदेशमात्रेण नर्तितस्य निर्विण्णनटस्य वृत्तान्तः पुरुषवृत्तान्ते गुणीकृत्याध्यारोपितः । अत एव पुरुषे निर्वेदभावो व्यञ्जनापथमवतरति । अप्रस्तुतप्रशंसास्वीकारे तु नटमालम्ब्यैव निर्वेदः सामाजिकाय स्वदेत. २. सिद्धियोगजो धर्मः, स एव भगवत्साक्षात्कारहेतुरिति कुसुमाञ्जलौ स्थितम. ३. 'योगश्चित्तवृत्तिनिरोधः' इति पातञ्जले सूत्रम.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDH

(प्रविश्य ।)

महाव्रतकापालिकः—एशे म्हि हके । कीश आणवेदु भावे । (क)

जाबालिः—(सभयम् ।) क एष नरकपालमालया भीषणकलेवरः सुराचषकास्वादकषायलोचनः समुच्चित इव नरकराशिरुपाध्यायमनुधावति ।

पतञ्जलिः—वत्स, पाषण्डमहाव्रतसिद्धान्तोऽयम् । अलमनेन ।

महाव्रतकापालिकः—ममं पि तुए णत्थि पओअणम् । (ख)

(इति निष्क्रान्तः ।)

पतञ्जलिः—वत्स महाव्रत, सार्वभौमः साधयतु पुरुषम्, अभिसारयतु च सिद्धिम् । यस्य खलु

जात्यादेशेन कालेन व्यवस्थाभिरविप्लुतम् ।
हिंसारत्यनृतस्तेयपरिग्रहविवर्जनम् ॥ १८ ॥

(नेपथ्ये ।)

अयमसौ बध्नाति पञ्चप्रकारं परिकरं पुरुषप्रसाधनाय सार्वभौमो महाव्रतानाम् । न पुनर्दवीयसी सिद्धिरनेनाभिसारयितुं शक्यते । १

पतञ्जलिः—वत्स जाबाले, नियमगणो यमानामग्रतो भूत्वा सिद्धिमाहरतु ।

(प्रविश्य ।)

निर्जरः—एशे म्हि अलिहन्तशासणशलाहणिज्जे णिज्जलेणाम णियमे । (ग)

(क) एषोऽस्म्यहम् । किमाज्ञापयति भावः ।

(ख) ममापि त्वया नास्ति प्रयोजनम् ।

(ग) एषोऽस्म्यहमहच्छासनश्लाघनीयो निर्जरनामा नियमः ।

---

१. कापालिका हि 'रुद्रो ह वै महाव्रतं चकार स नरशिरः कपालं बिभर्' इति श्रुतेर्भगवतो भैरवस्य कपालधारणाच्च तदेव महाव्रतमिति मन्यन्ते. २. 'ब्राह्मणो न हन्तव्यः' इति जात्या, 'तीर्थे पर्वणि यज्ञे विना कोऽपि न हन्तव्यः' इति कालदेशव्यवस्थाभिर्नियमिताहिंसा । एवमस्तेयम्, सत्यम्, ब्रह्मचर्यम्, अपरिग्रहश्च कालजातिदेशव्यवस्थानियमितश्चेत् तदा यम इत्युच्यते । स एव 'कोऽपि कदापि कुत्रापि कथमपि न वध्यः' इत्यादिरूपो महाव्रतमित्युच्यते.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पतञ्जलिः—(विलोक्य ।) वत्स, निर्याप्यतामियमार्यजनदर्हणीयः पुद्गलाधमः, योऽयमस्नानमौनमलपङ्कधारणतिष्ठद्भोजन् तप्तशिलाधिरोहणकेशोल्लुञ्चनादिना जीर्यति जीवाजीवसंवनहेतुः संवर इति मन्यते ।

निर्जरः—हदंशा, तुमंपि शावआह पलिअलिदव्वदंशणेत्ति शअं जेच्च शाहमि १ (क) (इति निष्क्रान्तः ।)

जाबालिः—भगवन् उपाध्याय, नियमगणो निवेदयति—'अन्यदपि दवीयसी सिद्धिः । अतः पुरुष एवास्माभिस्तपसा स्वाध्यायेनेश्वरप्रणिधानेन च पावनीयः' इति ।

पतञ्जलिः—बाढम्। अर्पयतु कर्माणि विश्वनिर्मातरि पुरुषोत्तमे प्रणिहितः पुरुषः ।

(नेपथ्ये ।)

अरे करुणामहार्णव,

स्वरसमपि वरं न भोक्तुमीहे
हर मम संवलसंचयं गृहाण ।
उपदिश कतरद्विदूरयात्रा-
श्रमशमनं भववर्त्मनोऽवसानम् ॥ १९ ॥

पतञ्जलिः—श्लाघ्यमिदं वैराग्यमुमुक्षयोरनुरूपं पुरुषस्य वचनम् ।

(क) हताश, त्वमपि श्रावकस्य परिहरणीयदर्शन इति स्वयमेव साधयामि।

---

१. दिगम्बरा हि सप्त···लान्मन्यन्ते । जीवो विहङ्गप्रकृतिः, अजीवो देहादिः, यस्य मूलेन निर्मलस्यात्मनो भोगः, आस्रवा इन्द्रियाणि, संवरो जीवाजीवतादात्म्याभिमानः, निर्जरस्तपः, बन्धोऽज्ञानम्, मोक्षो निरावरणता. २. तपःस्वाध्यायेश्वरप्रणिधानानि नियमाः—इति पातञ्जलम् । तत्र तपश्चान्द्रायणादि, स्वाध्यायः प्रणवजपः, प्रणिधानं कर्मार्पणम्. ३. स्वरसं स्वर्गादिफलकम् । अत्र पथविरामविश्राममात्रकामुकस्य संवलोपभोगविरक्तस्य दूरपथिकस्य वृत्तान्तः । संसारसुखविमुखस्येश्वरे कर्माण्यर्पयतो मुमुक्षोर्वृत्तान्ते तादात्म्येनाध्यारोपितः पुरुषमालम्ब्य श्रमविषादनिर्वेदानुल्लासयति स्वादयति प्रेयांसं नाम भक्तिरसम्. [संवलः पाथेयं प्रतिवसति भोग्यत्वात्.]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(पुनर्नेपथ्ये ।)

सकलमपि मया स्वकर्मबीजं
त्वयि वृषवाह समर्पयांबभूवे ।
तन्न मम च न चेत्फलं प्रसूते
कथमधुनाप्यहमेव दोषभूमिः ॥ २० ॥

पतञ्जलिः—स्वदोषक्षयाशंसनपिशुनोऽयमस्य पुरुषोत्तमं प्रत्युपालम्भः ।

(नेपथ्ये ।)

अये नित्यप्रबुद्ध,
मम भवपथिकस्य कर्मभोग्यं
प्रलयनिशि त्वमपालयः शयालोः ।
इति सकलमकिंचनो बुभूषुः
प्रहरकवेतनमेतदर्पयामि ॥ २१ ॥

पतञ्जलिः—साधु, तावदिदं व्यपदेशेन भगवति सर्वकर्मणामर्पणम् ।

(नेपथ्ये ।)

भगवन्, अवतर नयनवर्त्मनीत्येवाशास्महे । न खलु त्वया नेदीयसोऽपि फलन्ति क्षेत्रज्ञक्षेत्रे कर्माशयाः । पश्य ।

---

१. अन्यो बीजस्वामी स्वबीजानि हलवृषवाहके समर्प्य स्वयं निर्दोषो भवति । सस्यानुमन्ता हलवाहको दैवं वापराध्यति । मया तु त्वयि धर्माधिष्ठातरि वृषभवाहने कर्माण्यर्पितानि, तानि च निर्दोषतया मयि निष्कामतया फलं न प्रसुवते, मम तु दोषाः रागद्वेषमोहा न विरमन्तीति व्यतिरेकव्यञ्जनमुखेन दोषक्षयाभिलाषं भावमुल्लासयन्ति.
२. प्रलये निरुद्धवृत्तेः भवपथिकस्य पुरुषस्य कर्मणामवेक्षणम् पुरुषोत्तमकर्तृकम् निशि यामिकेन पथिकोपभोग्यसंबलपालनत्वेनाध्यवसीयते । तच्च सकलोपभोग्यकर्मणां ब्रह्मणि पुरुषकर्तृकमर्पणम् । प्रतीतिशब्देन हेतुरित्युच्यते । कर्मार्पणे प्रहरकवेतनत्वेनाध्यवसितेः संबलपालनाभेदेनाध्यवसितकर्मावेक्षणस्य हेतुतैाध्यवसायसंभवत्त्वात् । वरमेतावतेतिशब्देनोक्तहेतुतोपपादकतया व्यङ्ग्यार्थस्य गुणीभूतव्यङ्ग्यत्वमनुमन्यते.
३. सकलमपीत्यादिना दोषक्षयाशंसा व्यञ्जिता । अधुना तु दोषक्षयोऽपि कर्मफलानुत्पत्त्यर्थमपेक्ष्यते । सा च त्वद्दर्शनान्तरीयकफलत्वात् पृथक्तया नाशास्यत इत्याह—'भगवन्' इति । एतेन कर्मार्पणमपि त्वद्दर्शने चरितार्थमित्युक्तं भवति विरहितभोग्यभोग्येतिपरिकरेण दुर्भगबालिकोपमा वृषाङ्कस्य व्यज्यते । वृषाङ्कपदयोगार्थस्तु साधारणो धर्मः. ४. फलपर्यन्तमाशेरते इत्याशया अदृष्टानि.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदि विरहितभोगभायदूरा-
द्व्रयसि वृषाङ्क तदा फलानि सूते।
स्वपदमुपदधासि यत्र तस्मि-
न्भवति कडङ्करमेव कर्मबीजम् ॥ २२ ॥

पतञ्जलिः—वत्स जावाले, सत्यमाह पुरुषः। भगवति परात्परे दृष्टे खत्व एव क्षीयन्ते कर्माणि। तदस्मै सूनृतमधुरवचसे तावदासनमुपनीयताम्।

जावालिः—इदमर्हदनुशासनावशिष्टं वीरासनमुपतिष्ठते।

पतञ्जलिः—नहि नहि। मृदुस्थिरं सुखमासनमुपनीयताम्।

स्थिरसुखवृषी निषण्णः प्राणानायास्य दीर्घपथदृनान्।
प्रत्याहृतेन्द्रियगणो विश्राम्यतु निर्भरं पुरुषः ॥ २३ ॥

(नेपथ्ये।)

प्रत्याहृतानि विषयेभ्यः करणानि।
वहति करणमान्तरं स्ववृत्तौ
बत विलयं बहिरिन्द्रियव्रजस्य।
कमठ इव कठोरपृष्ठकुक्षौ
चरणचतुष्टयकन्धरामि कोचम् ॥ २४ ॥

पतञ्जलिः—तदधुना ध्यायते धारयते समादधते पुरुषाय संयमो दुदितरं प्रयच्छतु सिद्धिम्।

जावालिः—आचार्य, किमेतत्। पश्य तावद्दिवापि दीप्यमाने दिवाकरे

कर्पूरैः परिपूरिता इव विसच्छेदैर्विकीर्णा इव
प्रालेयोपलसंचिता इव सुधासिन्धौ निगग्ना इव।

---

१. तुच्छसख्यम्. २. एतावता यमनियमासनप्राणायामप्रत्याहाराणां संपत्तिः सूचिता। तत्र प्रत्याहारो बहिर्वृत्तिनिरोधेनान्तःकरणमात्रस्य वृत्तिप्रसरः. ३. विषयान्तरीपरक्ते ब्रह्मणि प्रत्याहृतचित्तस्य निवेशनं धारणा, तत्परम्परैव ध्यानम्, विषयान्तरपरिहारेण ब्रह्मध्यानं समाधिरिति त्रयाणां समुदितानां संयम इति संज्ञा। स एव दृढभूमिः सिद्धि नाम योगजधर्मं जनयति.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कसात्कैरवकाननस्मितरुचा संवन्धिनां कौमुदी-
मुद्भ्रीवप्रचरच्चकोरतरुणी पीतां दिशो बिभ्रते ॥ २५ ॥

पतञ्जलिः—वत्स, इयमसौ पुरुषमभिसरन्त्याः सिद्धेः शरीरज्योत्स्नाकृत्स्नमपि जगदुद्द्योतयति ।

जावालिः—आचार्य, क एष कतिपयपुरुषपरिवारितो रुचिविजितराजपट्टो राजलक्ष्मीलाञ्छितो विद्रुत्य वने निलीयते ।

पतञ्जलिः—वत्स, क्षेत्रज्ञनगरनरपतिरसौ तामसप्रकृतिर्महामोहः सिद्धिकौमुदीवृद्धिमसहमानो रिद्र(?)वनकुमाराभ्यां द्वेषरागाभ्यामनुगम्यते ।

जावालिः—कथमिदमाचार्येण राजविद्विष्टमनुष्ठितं कर्म, यदसौ सिद्धिः पुरुषप्राप्त्या परमप्रगल्भतां नीता ।

पतञ्जलिः—श्रुतिनिदेशवशंवदा वयमस्वतन्त्रास्तया प्रेरिताः प्रवर्तामहे ।

जावालिः—ननु महामोहपरिधारेष्वेवान्तर्भूतेयमिति विश्वजनीनवृत्तिरतिनृशंसमनुतिष्ठति भगवती । तथा हि ।

इयतो दिवसानसौ श्रुतिस्तनयौ मोहपतेरलालयत् ।
चरमे वयसि स्थिता कथं वत विश्वस्तवधं विधित्सते ॥ २६ ॥

पतञ्जलिः—वत्स, निसर्गसुन्दरस्यापवर्गस्य साम्राज्यमभिसंधाय सर्वमचेष्टत भगवती श्रुतिः । सर्वा एव रागद्वेषलालनविधिव्यासेधप्रवृत्तयो निवृत्तिपराः । निवृत्तिः सान्वयमहामोहोन्मूलनपरेति ।

जावालिः—एवमनया सिद्ध्या नगरविषयान्निर्वासितोऽपि सूक्ष्मविषयवननिलीनो महामोहः केन व्यापारेण प्रापणीयः परं लोकमिति ।

पतञ्जलिः—

पूर्वं प्रमित्या परतोऽनुमित्या सिद्ध्या ततोऽस्मिन्पुरुषे प्रसक्ते ।
संगच्छमाने पुरुषोत्तमेन मोहः स्वयं प्राप्स्यति नाशमेषः ॥ २७ ॥

(नेपथ्ये ।)

अरे पुरुष, किमितस्ततो धृतिमलभमानः किमपि वस्तु मृगयसे ।

---

१. सिद्धिसंपदा स्थूलाभिमानो नश्यति, न तु सूक्ष्माणामन्तःकरणलिङ्गशरीरादिवस्तूनामभेदभ्रमः सिद्ध्या विरमति, किंतु विवेकात्.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दाः श्रोत्रसुखाः पदार्थगुरवो रूपाणि चित्राणि च
स्पर्शाः पक्ष्मलकोमलाः सुरभयो गन्धा रसाः स्वादवः ।
लोका भोगमया गुणाः प्रगुणतां प्राप्ताः स्वतन्त्रा गतिः
सिद्ध्या सार्धममीषु वत्स विहरन्त्रीव्याः सहस्रं समाः ॥ २८ ॥

पतञ्जलिः—इयमसौ मधुमती महामोहप्रेरिता पुरुषोत्तमदर्शनविरोधिषु विषयभोगोपसर्गेषु पुरुषं व्यापारयति ।

(नेपथ्ये ।)

भगवति नियते विदूरयात्रासहचरि संसरणाध्वनोऽयमन्तः ।
जरति विरम निःसहासि संविन्नगरमतः परमद्वयोपभोग्यम् ॥ २९ ॥

पतञ्जलिः—साधु वत्स, नियतिरपि त्वयावधीरिता, का नाम मधुमती । तदचिरादेव संयमदुहितृसिद्धिधर्मव्यापारेण पुरुषोत्तममासादयिष्यसि । वत्स शाण्डिल्य, सिद्धमस्मत्साधनीयम् । अधुना चामुना व्यापारेण न चेतितं परिणतमहः । तथा हि ।

पश्यामि क्रुधधामतोरणशिलादारुस्खलत्केतना-
दस्मात्सौधनिकेतनाज्ज्वलनिधेः संध्यापिशङ्गीरपः ।
विक्षिप्तान्परितो हरित्सु युगपत्संक्षिप्य पादानसौ
यासां कुक्षिविले मिमङ्क्षति जगत्कासारकूर्मो रविः ॥ ३० ॥

अपि च ।

पौरस्त्येतरसिन्धुनायकपयःपूराजिरे चुम्बित-
द्राघीयः प्रतिबिम्बमम्बरतटव्यालम्बि बिम्बं रवेः ।

---

१. समाधिसाक्षात्कृतव्यवहितविप्रकृष्टवस्तुसमुत्थो भोगो मधुमती. २. 'न कर्मणा न प्रजया धनेन त्यागेनैकेनामृतत्वमानशुः' इति श्रुत्या कर्मनिरपेक्षज्ञानसाध्ये फले केवलं साभिलाषतामभिव्यञ्जयती मधुमती भोगे समाधिधर्मसाध्ये सुतरामनभिलाषं व्यञ्जयति—भगवतीत्यादि । विरम स्वव्यापारमुपसंहर । संविन्नगरे आत्मनिर्विकल्पके । मोक्षहेतावद्वितीयस्य मम प्रवेशो विद्यते विषयतया, तव तु सहकारितयापि तत्र प्रवेशो नास्तीति हृदयम्. ३. तोरणं द्वारम् । शिलादारु अधःस्थितदारु । केतनात् पताकायाः । 'तोरणोऽस्त्री बहिर्द्वारम्' इति, 'अधःस्थाद्दारुणि शिला' इति चामरः । तथा च—'स्तम्भाधारभूतमस्यनि शिला' इत्यमरटीकायां क्षीरस्वामी. ४. मङ्क्षुमिच्छति, मज्जनं कर्तुमिच्छतीत्यर्थः. ५. पूर्वेतरे पश्चिमे. ६. जलोपरिगते रवौ दीर्घः प्रतिबिम्बः स्तम्भत्वेन, रविः कनककलशत्वेन, समुद्रः शक्रध्वजनिखननरङ्गवाटत्वेनाध्यवसीयते.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitized by eGangotri.Funding: MIDF

संध्यानाटकरङ्गवाटविषये शक्रध्वजं हाटक-
स्तम्भोत्तम्भितशातकुम्भकलशोपेतं समाधित्सति ॥ ३१ ॥

जावालिः—भगवन् उपाध्याय, दर्शनीयमिदमग्रतः । पश्य ।

मग्नार्धो वरुणालयाम्बुनिधमद्धूमोद्गमो लक्ष्यते
[2]गोकर्णायतरश्मिसूचिजटिलः पृष्ठावशिष्टो रविः ।
वासश्वभ्रमभिप्रवेष्टुसवनीमर्माविधः श्वाविधो
व्याधास्रव्यधशोणिताक्तशललीशालीव पश्चाद्वपुः ॥ ३२ ॥

पतञ्जलिः—(निरूप्य ।) कथमयमामूलोत्खातमयूखजालविवरावलिजर्जरो गगननागरङ्गफलनिस्तलस्तुलितसंध्याभिषेकसहस्रधारताम्रकलशः सशिखमुण्डितरूणमुण्डपिण्डायमानमण्डलो भगवान्मार्तण्डो वारुणवरुणालये निमग्न एव । पश्य ।

धूमायते सिमसिमायितमातनोति
फेनायते विवृतबुद्बुदधारमम्भः ।
मग्नोऽपि पश्चिमसरस्वति दूरमाभि-
र्निर्द्धूयते न रविरच्छतराभिरद्भिः ॥ ३३ ॥

किं च ।

अद्भिः करप्रकरनिर्गमरन्ध्रमार्ग-
निःशूषिताभिरतिभारगुरूदरोऽर्कः ।
निर्वाति लुञ्चितकदम्बतुलामुपैति
क्षिप्रं निमज्जति च पश्चिमसिन्धुपूरे ॥ ३४ ॥

(इति निष्क्रान्ताः सर्वे ।)

इति निदिध्यासनधर्मसंपन्नाम तृतीयोऽङ्कः ।

---

१. उपतपत् तेजसो जलसंबन्धादुद्गतो धूमो धूम्रशल्यकमावर्ण्यसंपादकः. २. अङ्गुष्ठानामिकयोः प्रसारितयोरन्तरालपरिमाणं गोकर्णः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चतुर्थोऽङ्कः ।

(ततः प्रविशति पुरुषः ।)

पुरुषः—हन्त हन्त, प्रसन्नं मे भगवतः समाधिधर्मसिद्धिमुत्पादयता संयमेन । यतः ।

कर्मभ्यः[1] परमीक्षिपाणिचरणश्रोत्रोज्झितं चेतना[3]-
मात्रोपेतमितस्ततश्च फलितब्रह्माण्डलिक्षाचयम्[4] ।
आम्नायान्तनिकेतकोणशयितं पश्यामि मायाजर-
त्कन्थाग्रन्थिविदारणेन विवृतं वृद्धं परं पूरुषम् ॥ १ ॥

(प्रणम्य ।) भगवन् आपन्नकरुणानिधे,

विषमनिगमकाननान्तशाखाव्यतिकरवेष्टितमूर्तये नमोऽस्तु ।
बहुतरजगदण्डबीजपूरप्रसवफलेग्रहिपादपाय तुभ्यम्[5] ॥ २ ॥

(प्रविश्य पटाच्छन्नः पुरुषोत्तमः ।)

पुरुषोत्तमः—अरे पुरुष, कच्चित्त्वया दृष्टमात्मनः स्वरूपम् ।

पुरुषः—भगवन् अनादिनिधनचिदानन्दनिधे,

जगदिदमुपजीवयलविद्यातिमिररिपौ त्वयि न स्वमप्यवैमि ।
प्रतपति तपनातपे तप(पा)र्तो भजति यदान्ध्यमसावुलूकलोकः ॥ ३ ॥

पुरुषोत्तमः—अपि त्वया विदितो मम महिमा ।

पुरुषः—अपारमहिमन् अनन्त,

बहुतरजगदण्डभारभर्तुर्नहि महिमानमहं तवावयामि ।
मशक इव शैलाटुगर्भजन्मा विटपवृहत्त्वमुदुम्बरद्रुमस्य[5] ॥ ४ ॥

पुरुषोत्तमः—एवमप्यनन्यशरणः कथं मामाश्रितवानसि ।

पुरुषः—भो भूतभावन,

---

१. 'परं कर्मभ्योऽमृतत्वमानशुः' इति श्रुतेः. २. 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः' इति श्रुतेः. ३. चेतनापदेन ज्ञानेच्छाप्रयत्ना उच्यन्ते, मात्रपदेन शरीरेन्द्रियाणि व्यवच्छिद्यन्ते. ४. प्रथमं बहिरर्थावृत एव आत्मा प्रकाशत इति. ५. आमफलं शलाटुः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitized by eGangotri.Funding: MIDF

भवदभिमतमेव सेवमानो हितमहितं च वृथा त्वयास्मि बद्धः ।
तदपि कतममाश्रये शरण्यं वत परवानितरः पतिस्त्वमेकः ॥ ५ ॥

पुरुषोत्तमः—कथमात्थ मदीहितमिदं वृथेति ।

पुरुषः—नाथ, विमृशन्नपि नेदमवधारयामि किमत्राभिसंहितं भगवतः । यतः ।

नव इव वशगो भवामि यासामहमपहस्तितसर्वभूतपूर्वः ।
प्रकृति[1]चरितनाट्यसूत्रधार भ्रमयसि मामियतीषु भूमिकासु ॥ ६ ॥

पुरुषोत्तमः—ननु नटा इव भूमिकाभिः पुरुषा अप्यारोपिताभिः शरीरपरम्पराभिर्हासयन्तीति तावत्प्रथमं मम संसारप्रवर्तने निमित्तम् ।

पुरुषः—हन्त भोः, अद्यापि मामनुकम्पस्व ।

वरमुपहसनीयवर्णिकोऽहं विविधविकारविडम्बितस्वरूपः ।
तदपि कृ[2]तकहासमात्रहेतोर्विरम निवारय निःसहोऽस्मि मायाम् ॥ ७ ॥

पुरुषोत्तमः—केन हेतुना मयानुकम्पनीयोऽसि ।

पुरुषः—ननु ममानन्यशरणतया त्वदायत्तता प्रथमो हेतुः पश्य ।

भवदभिरुचितासु मे क्रियासु व्यवहरतोऽनुदिनं हिताहितासु ।
जननिधनबन्धमोचनेषु प्रभुरसि भूतपते तवास्मि दासः ॥ ८ ॥

पुरुषोत्तमः—कथमनन्यशरणोऽसि । स्मरसि नाम मामचिन्तयन्नेव चिरतरममीषु विविधप्रकारेषु कलेवरेषु विहरमाणो गमयसि स्म समयम् ।

पुरुषः—एवमेतत् ।

पुरि पुरि विहरामहे भ्रमन्तः पुरहर पश्यसि भोगवञ्चितोऽस्मान् ।
किमिति न विहरेम नाथवन्तो वयमितरे त्वमनाथ एक एव ॥ ९ ॥

पुरुषोत्तमः—यदि मया नाथवानसि कुतो मामियन्ति दिनानि नाद्राक्षीः ।

---

१. प्रकृतिः माया । अन्यत्र नटभूमिकायां नरः । सोऽहमपि तु नट इति स्मर्यत एव, न च पूर्ववृत्तमनुपस्थितं भवति । अत्र तु भूमिकायां नव(र) इव वशीभवन्न स्मरति भूतपूर्वमिति व्यतिरेकः. २. कृतक एव तव हासः, न हि विकृतवस्तुदर्शनजन्मा हर्षो हासहेतुस्तव विद्यते.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुरुषः—सखिद्विषदुदासीनेषु समवृत्तेस्तवायमकिंचनताविलासः ।
स्वपिषि न परकर्मसु प्रसक्तः परमुपभोजयतस्तव क भोगः ।
परचरितमवैषि निर्निमेषः प्रकृतिदरिद्र न कोऽपि पश्यति त्वाम् ॥१०॥

पुरुषोत्तमः—कथमकिंचनोऽसि । तुभ्यमधुना समर्पयामि नृतनातिथिसमुचितान्भोगान् ।

पुरुषः—गतः स भोगसमयः । संप्रति तु
श्रुतिजनक रटत्यसौ कुमारी तव दुहिता बहिरेत्य नेति नेति ।
व्यवहितनिकटस्थितोऽसि यस्मात्त्वयि मिलितेऽपि ममातिथेः क भोगः ११

पुरुषोत्तमः—हंहो पुरुष, प्रभवतो ममापकर्षं सूचयता वचसा कुतो नापत्रपसे ।

पुरुषः—प्रभुतोपकरणेषु परिजनेषु तथा तथा निष्कारणबन्धपीडनान्याचरतस्तवापि क्वागादपत्रपा घृणा च ।
स्मरसि कथमनन्यसाक्षिवृत्तां प्रभवकथाविधुरां निजामवस्थाम् ।
पुनरपि न चिराज्जनार्दन त्वां न परिचरिष्यति चेतनो द्वितीयः ॥१२॥

पुरुषोत्तमः—अक्षीणचेतनाकोपस्य मम न परिजनायत्ता प्रभुता ।

पुरुषः—तव चैतन्यधनागमेऽपि विमर्षणीयमेतत् ।

---

१. 'न द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते' इति श्रुतेः. २. 'न द्रष्टुः' इत्यादिश्रुतेः. ३. न तव क्वापि वस्तुनि परिग्रहः संभवति, लाभदायादीनां वित्तागमानामभावात्. ४. श्रुतिजनक नहि जनकान्यस्य पुंसः श्रुतौ स्वाम्यम् । बहिरेत्य करणगोचरतामागत्य । नेति नेति 'अथात आदेशो नेति नेति' इति श्रुतिः । व्यवहित इति व्यापकोऽपि न दृश्यते । त्वयि इति तैस्तैरुपायैरन्विष्य साक्षात्कृतेऽपि न भोगः, 'अशरीरं वा वसन्तं प्रियाप्रिये न स्पृशतः' इति श्रुतेः. ५. अनया व्याजस्तुत्या कार्पण्यगर्हितगृहमेधितादात्म्येनाहमध्यवसितः. ६. 'एको ह वै नारायणः आदावासीत्' इति श्रुत्या त्वदन्यस्य सर्गादौ चैतन्याभावे त्वदृत्तमन्यो नाज्ञासीत्, न हि संसारिणां तदा प्रसवः शरीरपरिग्रहः. ७. जनानामर्दनकर्तेति परिकरेण क्रोधनप्रभुचरितमभिव्यज्यते.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मतिर्धनमितरे सुदीर्घनिद्राप्रवणधियस्त्वयि निक्षिपन्त्यतन्द्रे ।
तदपहरणसंचितो न जातु व्ययमुपगच्छति चेतनानिधिस्ते ॥ १३ ॥

पुरुषोत्तमः—ननु कर्मानुरूपफलदाय मह्यमसमञ्जसमसूयसि । कुरु तथा कर्माणि, प्राप्स्यसि सोमरसमवलिहन्नमरलोकम् ।

पुरुषः—किमद्यापि मां विप्रलम्भसे ।

व्यरमदुवसरः स यत्र कर्मप्रकरमकार्षममर्त्यलेह्यलोभात् ।
न पुनरपि पिबामि सोमपात्रामृतदधि राहुविडाललीढशेषम् ॥ १४ ॥

पुरुषोत्तमः—एवमतिकलहायमानेन त्वया मया सह विग्रहः किमारब्धः ।

पुरुषः—परविग्रहरचनव्यसनितया तवैव कोपः क्षीयते । मम तु भवदुपरचितकोषनिकायस्वीकारलब्धात्मनो भोगाय विग्रहवत्ता । पश्य ।

क्षितिविवरेऽपिहितं जरायुपेशीस्थगितमथाण्डसमुद्भवे निगूढम् ।
त्वयि रचयति विग्रहान्प्रसह्य द्रुहिण तवापहरामि धातुकोपम् ॥ १५ ॥

अपि च ।

परेषां वधबन्धार्थमुत्पादयसि विग्रहान् ।
अविग्रहः स्वयं तूष्णीं ताटस्थ्यमवलम्बसे ॥ १६ ॥

पुरुषोत्तमः—कथं मम निसर्गनिर्मत्सरस्य खलताकलङ्कमुपन्यस्यसि ।

पुरुषः—कः खलु खलो भवन्तमतिशेते ।

---

१. परनिक्षेपापहरणसंचितधनस्य वसुव्ययमसहमानस्य कृपणस्य तादात्म्यमध्यारोप्य प्रथमतो गर्हा, ततोऽपवर्गनिद्राप्राक्कालिकक्षणविनश्वरसाक्षात्कारविषयस्य भगवतश्चैतन्यघनस्याक्षयतया तदालम्बितो भक्तिभावः स्वदते. २. सर्वमुक्तौ जीवचैतन्याभावात्. ३. सोमस्थितात्तविरक्तस्य तल्लाभोपायभूते सोमलतारसे सुतरां विराग इति भावः. ४. तवायं सकलोऽपि धातुकोपस्त्वन्निर्मितत्वात्, स त्वया क्षितिविवरे जरायुपेश्यामण्डे च निगूढः शरीरस्यौद्भिज्जरायुजाण्डजस्वेदात् । तं चाहमात्मसाक्षात्करोमि । तदेवद्विग्रहवचनायास्तव फलम् । शरीरघटना हि युद्धवचनत्वेनाध्यवसीयते. ५. धातूनां रसादिशुक्रान्तानां संचयः कोपः शरीरम्, स कनकादिधातुकोपत्वेनाध्यवसीयते.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Panini Kanya Maha Vidyalaya Collection. Digitized by eGangotri.Funding: MIDF

अचिरपरिचितो हरेः समूलं हरसि विशेषगुणव्रजं पररा ।
प्रथयसि खलतामिमामपूर्वां कथयसि यद्विगुणत्वमात्मनोऽपि ॥ १७ ॥

पुरुषोत्तमः—निरस्तसमस्तविभ्रमस्य खलु कुतः खलत्वस्यावकाशः ।

पुरुषः—नन्नु भवतोऽप्यन्यथावस्तूल्लिखन्ति विभ्रमाः ।
मयि फलकतया त्वया कियन्त्यः प्रतिकृतयो लिखितास्तथा विलुप्ताः ।
रजसि विगलिते विभूतियोगात्प्रमृजमलं मम पश्य दर्पणोऽस्मि ॥ १८ ॥

पुरुषोत्तमः—नित्यप्रबोधविधूतविधुरस्य मम न संभाव्यते भ्रमः ।

पुरुषः—हन्त भोः, विविधविकारमूलमायाविलाससाक्षिणो दुष्टदुर्विपाकमप्रतिघ्नतस्तव प्रबोधो न कस्यापि निश्रेयसाय ।
अलमवगलितेन्द्रियप्रवृत्तेस्तव जरतः पुरुषस्य जागरेण ।
प्रभवति दमनाय दोषदस्योः सपदि मनागपि मादृशां प्रबोधः ॥ १९ ॥
अपि च कलत्रदुश्चरितमर्षस्येर्ष्याकषायमुषितमनसस्तव किमनेन प्रबोधेन ।
विगतविपरीतोपदृष्टि पश्यन्वशयसि यं पुरुषप्रकाण्डमायाम् ।
प्रकृतिचपलया तया विकारैर्बहुविधवर्णिकया वशीकृताः स्म ॥ २० ॥

किं च ।

प्रकृतिरियमनश्वरस्वभावा सृजति महान्तमसौ यतो विकारम् ।
अविकृतमभिपश्यतः सतस्ते सह रमते ह्यनया सखा त्वदीयः ॥ २१ ॥

पुरुषोत्तमः—नन्वेवमपि मामबहुमन्यमानः कथमाश्रयितुमीहसे ।

---

१. समूलविशेषगुणसामान्योच्छेदो मोक्षः, स त्वद्दर्शनसमनन्तरं भावी क्षणपरिचितखलतिरोहितपरगुणाभेदेनाध्यवसीयते । अन्यः खलः परगुणास्तिरोदधदपि स्वगुणानाविष्करोत्येव । त्वं तूपनिषद्वाक्यैः स्वस्यापि नैर्गुण्यमेव प्रकाशयसि । ततः खलान्तरव्यतिरेकः सूचितः । खलतापदोषात्तावगणनं लताफलतः परमेश्वरनैर्गुण्ये विशेषणम्, तेनासदेव तव नैर्गुण्यमपि सूच्यते. २. मोहम्. ३. त्वमपि हि मयि प्रतिविम्बित इव दृश्यसे. ४. तव प्रबोधो न तव निश्रेयसं साधयति, तव नित्यमुक्तत्वात्, नाप्यस्माकं निश्रेयसार्थं, त्वयि प्रबुद्धेऽप्यस्मद्बन्धदर्शनात्. ५. न खलु जरापुरुषोऽजाग्रदपि दुष्टनिग्रहाय प्रभवति, करणपाटवाभावात्. ६. 'न दृष्टेर्द्रष्टेर्विपरिलोपो विद्यते' इति श्रुतेः. ७. 'स ईशो यद्वशे माया स जीवो यत्कृया जितः' इति. ८. 'अजामेकां लोहितशुक्लकृष्णाम्' इति श्रुतेः. ९. 'प्रकृतेर्विकारो महान्' इति. १०. 'द्वा सुपर्णा सहजौ सखायौ' इति श्रुतेः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पुरुषः—न त्वामाश्रित्यानाश्रित्य वा सुखमासे ।
क्वचिदपि विषये त्वया वियुज्य स्थितिमनवाप्य चिराय संसरामि ।
भवगिरिम(?)विदस्मि चित्समुद्र स्वमपि जहामि तदा लभे यदि त्वाम् २२

पुरुषोत्तमः—नन्वेवमपि मयि वान्यत्र वा क्वचित्संयम्य बधान धृतिम् ।

पुरुषः—नेदानीं मनसः क्वापि त्वामपहाय समाधानमुपपद्यते ।
अभिसरति परम्परं पुरारे विषयमनेकमपास्य पूर्वपूर्वम् ।
वरुणनिलयमापगेव यावद्भजति भवन्तमसौ न चित्तवृत्तिः ॥ २३ ॥

अपि च ।
परिमितविभवं कषायपाकं विषमतरं विषयान्तरं विहाय ।
निरवधिविबुधे समे समन्तात्त्वयि पुरुषोत्तम चित्तविभ्रमोऽस्तु ॥ २४ ॥

पुरुषोत्तमः—एवमपि मयि लीनचित्तवृत्तिः किमसदपकर्षपिशुनां वाचमुदाहरसि ।

पुरुषः—नाथ,
गुणमपि तव निर्गुणत्वपक्षे गमयति दोषकुलाकुलः प्रबन्धः ।
मलिनयतु नवेन्दुसुन्दराणि स्फटिकशिलाशकलानि काचसङ्गः ॥ २५ ॥

किं चेदमपि ममाभिप्रेतम् ।
अपगतपदपाटवोऽपि गर्भादुपनिषदामधुनोद्गतः प्रबन्धः ।
जनयतु तव कौतुकं कलेन प्रतिपदविस्खलितेन जल्पितेन ॥ २६ ॥

अपि चैतदाशासे पृच्छामि च ।
अपटुभिरभिधित्सितार्थबुद्धावनभिमतानपि बोधयद्भिरर्थान् ।
पुरमथन पराहतैरमीभिः कथय कदा विहसिष्यसि प्रलापैः ॥ २७ ॥

---

१. भगवता भवता सह वियुक्तस्य मम क्वापि विषये लोकद्वयेऽपि चिरावस्थानं न घटते, त्वल्लाभे त्वत्प्राप्तिमेव । तथा हि—'विज्ञानघन एवैतेभ्यः भूतेभ्यः समुत्थाय तान्येवानुविनश्यति' इति श्रूयते । तत्र विनाशो मूलक्षय इति सौगताः, विलय इति त्रिदण्डिनः । निर्मनस्कत्वश्रुत्या विदुषो विरहान्मुक्तस्य न स्ववेदनम् । आत्मानुमापक-प्रयत्नाद्यभावाच्च न परेण वेद्यत इत्यवेद्यत्वमेव मुक्तात्मनो विनाश इति नैयायिकादयः.
२. स्तोत्रादिस्वरूपोपासनाया अपवर्गोपयोगमाक्षिपति.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुरुषोत्तमः—ननु मनसा सह वाचो न मामासादयन्तीत्याम्नायते ।

पुरुषः—हन्त नाथ,

यदि सह मनसा तवाभिसारात्कुलगुरुभिर्निगमैर्निवारितासौ ।
स्वयमभिसर तर्हि वाचमेनां परपुरुषं निगमो न प्रश्नति त्वाम् ॥ २८ ॥

तेन हि लीलापरिगृहीतगिरिशविग्रहराजखण्डचूडामणे,

मम वचनजलानि कर्णशुक्तौ तव पतितानि गतानि मौक्तिकत्वम् ।
विगुणविलुठितानि लाजबुद्ध्या वसयतु कुण्डलकुण्डलिप्रकाण्डम् ॥२९॥

पुरुषोत्तमः—प्रसादय वत्स, वन्धविध्वंसिनीमनादिमादिप्रकृतिम् ।

पुरुषः—(आकाशे ।) हेरम्बकुमारयोरम्ब,

न तव पुरि शिलादपुत्रवेत्रव्रततिनिरुद्धतया लभे प्रवेशम् ।
गिरिशगृहिणि गौरि गोपुरेभ्यो बहिरुपविश्य शपामि नौमि च त्वाम् ३०

पुरुषोत्तमः—अपि पश्यसि माम् ।

पुरुषः—

पुरहर परदृष्टिदोषशान्त्यै कति जगदण्डकगण्डकान्विभर्षि ।
त्वदुपरि सहजप्रभोहदुष्टां कथमिव नाथ निपातयामि दृष्टिम् ॥ ३१ ॥

पुरुषोत्तमः—वत्स, सूनृतवचनोऽसि । प्रसन्नोऽस्मि ते । प्रयच्छामि संयमवशोपनतमप्रतिहतभौतिकं चक्षुः । पश्य मे स्वरूपम् । (इत्यावरणमपसारयति ।)

पुरुषः—(निरूप्य ।) अहो नु खलु भोः, इह बृहतामपि बृहत्तमे

---

१. एतावता प्रबन्धेन भवदभिनिविष्टबुद्धेर्वाचिकादिवाह्योपासनायाः प्रकृतिपुरुषादिगोचराया यथाकथंचिदुपयोगो दर्शितः । तथाविधोपासनासमवहितसमाधिवशाद्भगवत्स्वरूपसाक्षात्कारप्रकरणमिदानीमारभ्यते । साधितं हि भगवतोऽपि साक्षात्कारविषयत्वं न्यायकुसुमाञ्जलौ । पुरहरेत्यादि—बालादयो रक्षागण्डकधारिणो न डाकिन्यादिदृष्टिदोषैरभिभूयन्ते । त्वमपि नूनं जगदण्डगण्डकगणाभरणत्वादेव नास्मादृशां दुष्टदृष्टिपथमवतरसीत्युत्प्रेक्षया निर्दोषस्य मनसः समाधिधर्मतदहंकारेण त्वत्साक्षात्कारकारणत्वमिति सूच्यते. २. अपरिमितस्य प्रथमतः संयमवशाद्बहिरर्थाकारोपरक्तो भगवान् भासते, स एव हि विराडिति महता संदर्भेण विवियते—निरूप्येत्यादिना.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

निःसीमग्रहिमभूमनि चिदकूपारे प्लवन्ते च मज्जन्ति चोन्मज्जन्ति च जगदलाबूनि ।

कुत्राप्युज्जृम्भते जलात्कचिदपां गर्भे चिरादुप्यते
कापि भ्राम्यति कुत्रचिद्विदलति द्वेधा नखैर्ब्रह्मणः ।
कुत्रापि ज्वलति क्वचिद्धसितसाद्भूतं समुद्धूयते
तेजोभिः कचन कचिच्च तिमिरैर्ब्रह्माण्डमापूर्यते ॥ ३२ ॥

अपि च ।

ब्रह्माण्डानि हिरण्यगर्भगुरुभिर्गर्भैरपां संप्लवे
निर्मग्नानि समुद्धरन्ति कतिचिन्नीलत्विषः पूरुषाः ।
संवर्तानलहेतिभिर्भसितसाद्भूतानि यान्यन्यत-
स्तैरुद्धूलनमाचरन्ति विकटभ्राम्यज्जटाग्रा नटाः ॥ ३३ ॥

किंचेदमत्र परिपच्यमानोदरमर्मरितोपरितनपुटे विघटमानध्रुवध्रुवबन्धने गगनगोले किमपि कौतुकमालोक्यते ।

आविर्भवन्ति विदलज्जगदण्डगर्भा-
दश्वामुखानलशिखाः प्रलयप्रगल्भाः ।
बीजानि कालपरिपाकवशाद्विदीर्य-
माणस्य दाडिमफलस्य यथोच्छ्वसन्ति ॥ ३४ ॥

पुरुषोत्तमः—वत्स, संयमवशेन प्रथमतो दृश्यमाने विराड्भवे किमपरं पश्यसि ।

पुरुषः—एतावत्पश्यामि ।

अविरतपरिवृत्तदण्डकाष्ठाकुलमतुलव्यतिवर्तमानवेगम् ।
भ्रमयसि जगदण्डगोलमालाकलशकलापकुलालकालचक्रम् ॥ ३५ ॥

इदं चापरं च तर्कयामि—

अपरिमितविभागभूमिरेकस्त्वमसि ततो जगदण्डबिन्दुरासीत् ।
तदिति दशविधादिशामधीश त्वदवतरागणितक्रमेण सिद्धाः ॥ ३६ ॥

पुरुषोत्तमः—किमपरं ते प्रतिभाति ।

---

१. दण्डः काष्ठा च कालावयवौ; (पक्षे) दण्डकाव्यम्.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुरुषः—भगवन्ननन्त,

अहगृहसरसीरुहाणि राहुभ्रमरविमर्दसहार्ककर्णिकानि ।
नियतिपवनवेगघट्टितानि त्वयि करुणाकमलाकरे भ्रमन्ति ॥ ३७ ॥

पुरुषोत्तमः—कथय एवंविधं मम स्वरूपमवलोक्य कीदृशी चित्तवृत्तौ वर्तसे ।

पुरुषः—अरे दिगम्बर,

प्रकृतिमलिनमृक्षलक्षलिक्षाचयचितमम्बरचीवरं वसानम् ।
प्रकटितबृहदण्डमत्रपं त्वां पुरुषमुदीक्ष्य हसामि चोल्लसामि ॥ ३८ ॥

पुरुषोत्तमः—वत्स, प्रणिधेहि तावदन्तर्मुखेन संयतचेतसा मम संहरणलीलाम् ।

पुरुषः—(प्रणिदध्यौ ।) इदं पश्यामि ।

किरति सकलभूतवञ्चनाय त्वदुपरि पिष्टपसर्षपानविद्या ।
तदपि निमिषमात्रनिर्गतोऽपि प्रविशति भूतगणो भवन्तमेव ॥ ३९ ॥

अपि च ।

परपुरमभिविश्य सर्वलोकं भ्रमयति सर्वदिनेषु भूतवर्गः ।
भवपिशुनवनवाटबोधिवृक्षप्रलयनिशासु निलीय सेवते त्वाम् ॥ ४० ॥

पुरुषोत्तमः—अपि नाम पश्यसि संवर्तसमये मदीहितम् ।

पुरुषः—कथं न पश्यामि ।

---

१. बहिर्विषयसंकलितं भगवन्तमुपासीनस्यापि न विलीयन्ते चित्तविकारा इति भावः. २. सृष्टिलीलानुध्यानापेक्षया संहारलीलानुध्यानं वैराग्यप्रकर्षकत्वादन्तर्मुखचित्तवेद्यमित्याशयेनाह—'वत्स, प्रणिधेहि' इत्यादि. ३. भूतापसारणक्रियायां सिद्धयर्थप्रक्षेपोऽभिचारतन्त्रे विधीयते । तदभेदेन भूतानां प्राणिनामाविद्यकप्रपञ्चाध्यासमूलवञ्चनमध्यवसीयते । पञ्चानां भूतानामाविर्भावत्रिलयौ निर्गमप्रवेशत्वाभ्यामध्यवसीयते । निमिषादिप्रलयादिभिश्च सृष्टिकालापेक्षया महाप्रलयसमयस्य दैर्घ्यमभिव्ज्यते । एतेन च 'यतो वा इमानि भूतानि जायन्ते' इत्याद्याः श्रुतयो व्याख्याताः. ४. भूता नाम देवयोनयः परस्य पुरं प्रविश्य लोकानां भ्रमं जनयन्तो दिवसमतिवाहयन्ति । निशासु श्मशानपिप्पलादिद्रुममधिरुह्य तिष्ठन्ति । तद्वृत्तान्तो व्यञ्जनपथावर्तीर्णः प्रकृतमहाभूतवृत्तान्ते गुणीभूतः प्रतिभासते.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकृतिचटुलसूक्ष्मभूतिशेषप्रकृतिविकारनिकोचभाजि काले ।
अविरतपरिवृत्तिखेदखिन्ने स्वपतिजने प्रतिबुध्यसे त्वमेकः ॥ ४१ ॥

अपि च ।

विलयमुपजगाम चेदखण्डस्त्वयि जरठो जगदण्डगुल्मपिण्डः ।
क्षपयसि तदपि क्षपासनिद्रः कतिभिरसौ हि बुभूषति नरोहैः ॥ ४२ ॥

पुरुषोत्तमः—वत्स, पश्य क्षयसमयदग्धजगदण्डगणावशिष्यमाणस्य रुद्रगणस्य व्यवसितम् ।

पुरुषः—नाथ, पश्यामि ।

ब्रह्मस्तम्बकदम्बडिम्बफलिते दग्धे जगत्कानने
येषां नैष ललाटकोटरगतो निर्वाति कालानलः ।
ते वक्रेन्दुवकाधिवासविकृतोत्तंसभ्रमत्पन्नगाः
शिष्यन्ते जलवेगजर्जरजटाजालाविलाः स्थाणवः ॥ ४३ ॥

अये विश्वंभर, किमपि पृच्छामि ।

खपुटपटलमभ्युदीर्यदाशावृतिरदलन्निरवाद्रविप्रदीपः ।
विलयमवनिवास्त्वगात्तथापि क्व जगदगारगृहस्थ निश्यवात्सीः ॥ ४४ ॥

कथं च ।

प्रकृतिचपलपीलुबीजवर्गं दलितखगोलकुशूलविप्रकीर्णम् ।
अघटितमितरेतरेण कल्पप्रशमदिने समचीकलस्त्वमेकः ॥ ४५ ॥

पुरुषोत्तमः—वत्स, विश्वाधारस्य किमधिकरणम्, ऐश्वर्यसहायस्य किमुपकरणमन्विष्यसि । परिभावय तावत्सर्गलीलाम् ।

पुरुषः—भूतभावन, भावयन्पश्यामि ।

---

१. दोधूयमानुपरमाणुश्रेणे प्रकृतेर्मायाया विकाराणां जन्यद्रव्याणां निकोचेमवसानं भजमाने काले त्वमेव चेतनावान्, इतरस्तु निरुद्धकरणवृत्तित्वादचेतन एवार्थः । परिवृत्तिः प्रेत्यभावपरम्परा. २. विलयमिति । अस्फुटितस्य गुल्मव्याधेर्हिर्विलयेऽपि व्यथा न गच्छति, प्रत्युत बहुरूप गुल्मानामुद्भव इति वस्तुस्थितिर्गुणीभूता ध्वन्यते. ३. काननदाहे कोटरादिषु ज्वालाशालिनः सर्पवकाद्यधिवासभूताः नदीतटस्थाणव एवावशिष्यन्ते, तदभेदेन कालरुद्राणामध्यवसायः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रलयदहनदग्धशेषपीलुप्रकरशिलोञ्छपवित्रवृत्तिरादौ ।
घटयसि भुवनानि तेषु [1]जीवप्रकृतिचलैः परमाणुभिः शरीरम् ॥ ४६ ॥

पुरुषोत्तमः—ननु किमनेन सर्गादिशरीरेण प्रयोजनमुपपद्यते ।

पुरुषः—

जनशरण शरीरिणां प्रवृत्तैः करणगणैरुपलब्धचेतनानाम् ।
कतिचनजनुरन्तरानुभूतिप्रसृमरवासनया [2]स्मृतीः प्रसूषे ॥ ४७ ॥
अथ शयितविबुद्धवत्पुराणः स्मरति मुनिर्निगमं हिरण्यगर्भः ।
गगनपवनसंनिपातकर्ता कथयसि वा करुणानपेक्ष एव ॥ ४८ ॥

पुरुषोत्तमः—आः, किमनेन मदीयाम्नायेनाप्रतिपन्नसमयस्य सर्गादिजनस्योपकृतं भवति ।

पुरुषः—

ननु कृतककलेवरद्वयेन व्यवहरता च निदेशदायिना च ।
अवगमितपदप्रवृत्तिमादौ कवयसि लोकहिताय संप्रदायम् ॥ ४९ ॥

पुरुषोत्तमः—किमिव लोकहितं मम वचो जनयति ।

पुरुषः—

प्रभवति परमाप्तयो दुरन्तादपसरणाय हिते प्रवर्तनाय ।
सहचरति [3]चतुर्भिरर्थवादैर्निगमकवे स तवैव सूक्तसारः ॥ ५० ॥

पुरुषोत्तमः—ननु स्वतःप्रमाणमसौ चोदनाविधिनिषेधौ बोधयन्ती प्रवर्तयति निवर्तयति च मदीयमिदं वचनमिति कुतो निरचायि ।

पुरुषः—अये निवृत्तिधर्मोपदेशगुरो,

---

१. जीवादृष्टप्रेरणया कर्मवद्भिः. २. तथा च शरीरं स्मरणाय, स्मरणं हिरण्यगर्भादेरागमोच्चारणानादिरेवासावाम्नायः । प्रतिकल्पं हिरण्यगर्भादयः प्रणष्टमनुस्मरन्तीत्येकः कल्पः । वर्णोच्चारणे कण्ठादीनां कण्ठत्वादिस्वरूपेणैव नापेक्षणीयत्वम्, किंतु विलक्षणपवनव्योमसंयोगाय, स पुनरशरीरशरीरस्यापि तवैव प्रयत्नेन संभवतीति किमाम्नायप्रवर्तने शरीरेणोपकर्तव्यमित्यपरः कल्पः. ३. स्तुतिःनिन्दा-परकृतिः-पुराकल्प इत्यर्थवादाः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवतु विधिरपूर्वकार्यतत्त्वाशयहितसाधनताभिधासु कश्चित् ।
तदपि मुषितदोषमन्तरा त्वां न भवितुमर्हति चोदना प्रमाणम् ॥ ५१ ॥

पुरुषोत्तमः—प्रवर्तनामप्युपदिशतो मम निवृत्त्युपदेशमेव कुतः श्लाघसे ।

पुरुषः—नन्वधुना विज्ञातं नास्ति तव वचसि प्रवृत्तिपरतेति ।
हितविधिकपटान्निसर्गमूढप्रकृतिरसाविह तान्निवर्तनीयः ।
इति विषमतमेऽपि संविधाने गणयतु कस्तव नाथ [2]कौशलानि ॥५२॥

संसार इव श्रुतिरपि त्वत्परैव । तथा हि ।

विकिरति परितो घनावलीव श्रुतिरमृतानि तवाशयादुदस्य ।
विलयमयमुपैति चित्समुद्र त्वयि जगती [3]निगमस्य च प्रवाहः ॥ ५३ ॥

पुरुषोत्तमः—ननु यज्ञेषु श्रुतिर्विश्राम्यति ।

पुरुषः—हन्त, यज्ञा अपि त्वत्परा एव ।

अजिनसु(मु)शलवेदिशूर्पशय्यां दृषदुपलस्य हविःकपालपूपैः ।
अथ गुरुयजमानहोतृगातृप्रभृतिभिरध्वरकर्मसु त्वमिज्यः ॥ ५४ ॥

पुरुषोत्तमः—ननु पालनलीलासु मम प्रवेशयं मनः ।

पुरुषः—इदमिदमवलोक्यते तवावनविलसितम् ।

---

१. अपूर्वं संकल्पो वा विधिरित्येकदेशिनः । कार्यं वैदिकलिङां मुख्योऽर्थ इति प्राभाकराः । कार्यतायां लिङो निरूढलक्षणेति त एव । आशय आप्ताभिप्रायो लिङर्थ इत्याचार्याः । इष्टसाधनता तथेति मण्डनः । अभिधाविधिरिति भट्टाः । तदपि विधेराप्ताभिप्रायकत्वाभावेऽपि संप्रदायप्रामाण्यार्थं मूलभूते त्वत्प्रत्यक्षप्रामाण्यमपेक्षणीयमित्यर्थः. २. उपनिषद्भागास्तावदर्थवादान्तरवन्न विधिशेषीभूताः, तेषां परमपुरुषार्थसाधनीभूतार्थज्ञानफलकत्वेन स्वाध्यायविषयतासंभवेन विध्यन्तरनिराकाङ्क्षत्वात् । किंतूपनिषदामेव सर्वे विषय इतिकर्तव्यतापूरकत्वेनोपयुज्यन्ते । यागादीनां च ब्रह्मज्ञाने आशयशुद्धिद्वारैवोपयोगः । सा च वैधेतरहिंसानिवृत्त्यादेरेव संभवतीति । न 'यजेत' इत्यादिवाक्यानां यागविधौ तात्पर्यम्, किंतु हिंसाविशेषपरिसंख्यायाम् । विधानं तु गुडजिह्विकान्यायेन प्ररोचनामात्रमिति तव कौशलम्. ३. वेदान्तेषु गीयसे । परिणामे च त्वमेवावशिष्यस इति भावः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रथमसमयसंगमाय नैतज्जगदुमजीवति केवलं भवन्तम् ।
भवतु सततसन्तमन्तरा त्वां कथमनिदं प्रथमापि वस्तुसत्ता ॥ ९५ ॥

पुरुषधौरेय, स्वस्ति तव धारणशक्तये ।
न धरणिरुपरि प्रयाति नाधः पतति न च ध्रुवते न वभ्रमीति ।
न च दिवि वसति स्वशक्तियोगादपि च भवानचलास्थिरत्वहेतुः॥९६॥

अपि च ।

प्रवहपवनवेगघट्टितोऽपि स्खलति नयज्जगदण्डपिण्डभारः ।
लघुगुरुतुलनातुलाप्रकाण्डद्रढिमगुणः स भवद्गुणत्रयस्य ॥ ९७ ॥

इयमपि तव जगदवनलीलैव । यत्किल

भ्रमयति नवधा खमण्डलानि द्रढयसि सप्तपुटानि भूतधात्र्याः ।
उपदिशति च पङ्क्तीर्ग्रहाणां ध्रुवमवपि ध्रुवयोरपि ध्रुवत्वम् ॥ ९८ ॥

इदमपि जनावस्थानसुखाय तवावनिघटनम् ।

---

१. यथा प्रथमक्षणसंबन्धाय त्वं कारणत्वेनापेक्ष्यसे तथा द्वितीयादिक्षणावच्छिन्नायां सत्तायां त्वमधिष्टात्वेनापेक्षणीयः । त्वदीयसत्त्वोपाधिकमेव हि सर्वेषां सत्त्वमित्यौपनिषदमताभिप्रायेणैतत्. २. ग्रहनक्षत्रादिभिरुदाकृष्यमाणा भूमिरनारतमुपरि गच्छति । वृक्षाद्विभक्तं पत्रमूर्ध्वं धावन्त्या भुवा संसज्यते न तु पततीति क्षपणकाः । तत्र । ग्रहादिभिः सह भुवः संनिकर्षप्रसङ्गात् । गुरुत्वादनारतमधो गच्छतीति त एव । तदप्यसत् । वियति विक्षिप्तानां शराणां कदापि भूपृष्ठाप्राप्तिप्रसङ्गात् । रिक्तगर्भो भूगोलो महत्यर्णवतोये तुम्बिकावत्तरतीति यवनाः । तन्मन्दम् । 'सलिले विलयो मृदो भवेदिति गोरप्सु न युज्यते स्थितिः' इत्यादिना लक्षेन दूषितत्वात् । भूचक्रस्यैवाभिमुखं भ्रमणं न तु ग्रहगोलादेः प्रत्यगभिमुखमिति दिगम्बराः । तदपि हेयम् । 'पूर्वाभिमुखे भ्रमे भुवः खकुलायं कथमाप्नुयुः खगाः' इत्यादिना लक्षेन निरस्तत्वात् । स्वशक्त्या वियति स्थिरमवतिष्ठते भूगोल इति सिद्धान्तविदः । तत्र स्वशक्तिपदार्थो भगवदधिष्ठानमेवेति भावः. ३. अन्यत्रापि तुलाप्रकाण्डे सूत्रतयावलम्बितफलकारोपितो भारो न स्खलति । तुल्या च लघुगुरुणी परीक्ष्येते इति ध्वनिः. ४. चन्द्रादीनां ग्रहाणां सप्तनक्षत्राणामेकं क्रान्तिपातस्याधिकरणं नवमं खमण्डलम् । सप्तपृथिवीपुटानि, तान्येव पाताललोकाः प्राक्प्रत्यग्दक्षिणोत्तराधरोर्ध्वाः पङ्क्तयः, सर्वग्रहाणां दक्षिणोत्तरौ ध्रुवाविति ज्यौतिषः. सिद्धान्तः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

[1]अविषमचबुरस्रषड्विभागं न सृजसि कन्दुकनिस्तलां नमूषे ।
घटयसि पृथिवीमिमां भचक्रभ्रमणकुलालविशालदर्पणाभम् ॥ ५९ ॥
पुरुषोत्तमः—अपि मम प्रलयसर्गावसानसमर्थं शरीरमपि पश्यसि ।
पुरुषः—नहि नहि ।
अपरिमितकृतेर्निराशयस्य भ्रमरहितस्य निरस्तचेष्टितस्य ।
दृषदुदरदरीषु दर्दुराणां घटनपटोस्तव कीदृशं शरीरम् ॥ ६० ॥
पुरुषोत्तमः—किमिमामाकस्मिकीं प्राकृतिकीं वा सृष्टिमभिमन्यसे ।
पुरुषः—
[2]न जगदिदमहेतुतो न शून्यादवधिमतां कथमुद्भवोऽस्त्वकस्मात् ।
प्रकृतिरियमधर्मधर्मरूपा पुरुषगुणः कथमारभेत विश्वम् ॥ ६१ ॥
पुरुषोत्तमः—ननु मामुपादानं निमित्तं वा जगतोऽनुमन्यसे ।
पुरुषः—
विशकलितमनुव्रजन्निचित्य स्थपतिरिव त्वमजीघटः प्रपञ्चम् ।
विभुरसि च न युज्यसे विकारैस्त्वयि समवैतु कथं स भूतवर्गः ॥६२॥
पुरुषोत्तमः—हन्त, तर्हि प्रपञ्चमसन्तं प्रतिपद्यसे ।
पुरुषः—न खलु न खलु ।
[3]त्वमखिलजगदीश षड्भिरङ्गैरुपचितवेदमजीजनः षडङ्गम् ।
कथय कथमसावुपैत्वसत्तां सततसतो भवतः स्वतः प्रपञ्चः ॥ ६३ ॥

---

१. द्वौ चन्द्रौ द्वौ सूर्यावित्यादिक्रमेणाष्टादशग्रहाः । चतुःपञ्चाशन्नक्षत्राणि भुवः सम-चतुरस्राः पार्श्वचतुष्टयोर्ध्वाधरभागाः । एकत्र भागे एकः सूर्यः, ततस्तृतीयभागे द्वितीयः। परिशिष्टप्राक्प्रत्यग्भागयोस्तु रात्रिरिति दिगम्बराः । ते च 'किं गण्यं तव वैगुण्यं द्वैगुण्यं यो वृथा कृथाः । भार्गेन्दूनां विलोक्याङ्गा ध्रुवमन्ये परिभ्रमम् ॥' इत्यादिना भास्करेण निरस्ताः । कन्दुकवर्तुला भूमिरिति ज्यौतिषिकाः, तेऽपि मया भूमाद्यसाधनप्रकरणे निराकृताः इति भावः. २. अहेतोर्भवतीत्यर्थकमकस्माद्भवतीति वाक्यम् । शून्योपादानकः संसार इति माध्यमिकाः । प्रकृत्युपादानक इति संचष्काणका नाम सांख्यैकान्तवादिनः कापिलाः । ब्रह्मोपादानक इत्यपरे सांख्यैकान्तवादिनो बादरायणाः । तान् निरस्य भगवत्कर्तृकत्वम्, 'विश्वस्य कर्ता' इति श्रुतिसिद्धमिह व्यवस्थापितम्. ३. सर्वज्ञतातृप्त्यादिबोधस्वातन्त्र्यलिया लुप्तशक्तेः अनन्तशक्तयः षडीश्वराङ्गानि, शिक्षादयः षट् वेदाङ्गानि । तथा च त्वया षडङ्गेन षडङ्गो वेद इव सता सत्तैव प्रपञ्चो जन्यत इति भावः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुरुषोत्तमः—वत्स, किमनेनासता सता वा प्रपञ्चेन। विहायैनमान्तरान्विषयान्परिशीलय।

पुरुषः—इदं तत्त्वदन्तः प्रणिधाय पश्यामि। आलोचनविकल्पाभिमानव्यवसायवृत्तिमतीन्द्रियमनोऽहंकारबुद्धीस्त्रिगुणमेकं प्रसूते, तदपरमविकारि पश्यतीति।

पुरुषोत्तमः—वत्स, कपिलकल्पितभेदमपहाय कर्तृचेतनयोरभेदमनुशीलय।

पुरुषः—एवमनुध्यायमाने कर्तृचेतनयोरभेदे तव मम च मध्ये जडं प्रतिभाति प्रधानव्यवधानम्।

पुरुषोत्तमः—तेन किं मामावृतं पश्यसि।

पुरुषः—नहि नहि।

शिव[1] तव मम चान्तरालभूमौ विविधविधिं व्यवधां व्यधात्प्रधानम्।
तदपि हि पिहितोऽहमेव भित्तिर्भवति वृतिः सदनस्य नाजिरस्य॥६४॥

किंतु विकारमलिनप्रधानान्तरितेन चक्षुषा त्वामनुशीलयन्निदं पश्यामि।

किमपि निविशति प्रकाशराशौ त्वयि यमुनेव रवौ विधाविवाङ्कः।
असिततनुचतुर्भुजं[2] स्वरूपं यदवतराहृदयं हरन्ति रामाः॥ ६५॥

पुरुषोत्तमः—वत्स, त्रैगुण्यमयप्रधानव्यवधानमपहाय मां निपुणं निरूपयन्नाकलयिष्यसि तत्त्वम्।

पुरुषः—हन्त भो, निपुणनिरूप्यमाणे त्वयि विच्छिद्यत एव द्वैतम्।

---

१. 'अजामेकां लोहितशुक्लकृष्णाम्' इति श्रुतिसिद्धा काचिदेकैवाविद्या। 'इन्द्रो मायाभिः पुरुरूप ईयत' इति श्रुतिसिद्धास्तु तद्विपरिणामभूता नानाविद्याः, तदवच्छिन्नं चैतन्यं जीवपदेनोच्यते, मूलभूताविद्यावच्छिन्नमीश्वरपदेन, अत एव मूलप्रकृतेः सर्वप्रपञ्चोपादानत्वात्तद्वृत्तौ प्रतिमितम् चैतन्यं सर्वज्ञपदेन व्यवह्रियते। अत एव न केनचिदज्ञानेनावृतोऽसौ, किंतु अयमुपासकानां चतुर्भुजादिशरीरोपेत इवापाततः परिस्फुरतीत्यभिप्रायेणौपनिषदमतसिद्धब्रह्माभेदविज्ञानप्रकरणमिदानीमारभ्यते.
२. उपासकैः परमे ब्रह्मण्यध्यस्तः कालीविग्रहः कृष्णविग्रहो वा ध्येय इत्युपदेशोऽयम्। रामाः भार्गवादयः स्त्रियो वा तदवतरा भवन्तीति उपासकैर्ध्येयमिति.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वममृतविषयप्रवेशभूमौ भवसि दृशोः पथि यस्य स द्वितीयम्।
जगति न परिपश्यतीति जिह्मा स्मरहर दृष्टिविषाधिका गतिस्ते ॥६६॥

पुरुषोत्तमः—एवमेव विषयान्तरप्रकाशदोषमेवनिरस्तद्वैतमद्वितीयतया दलितमहाभक्तपूर्वगोपानसीचरमसोपानभूतमस्मदर्शनम्।

पुरुषः—हा, किमेतत्।

उद्भुनि मयि रवे प्रकाशलेशं व्यवधिवशादपरीक्षितो व्यतारीः।
तदपहरसि संनिकर्षमेत्य त्वदुपरि तर्हि निजं वपुस्त्यजामि ॥ ६७ ॥

पुरुषोत्तमः—न केवलं बहिर्विषयप्रकाशमेव मुष्णाम्यात्मदर्शिनाम्, अपि त्वशेषामेव विशेषगुणसंपदम्।

पुरुषः—का पुनरत्र प्रतिक्रिया। अथ वा जानामि त्वयि कृतप्रतिकृतिम्।

भवपथपथिकोऽस्मि वाटपाटचर मिलितोऽसि विलुण्ठसंपदो मे।
अहमपि भवदन्तरं प्रविश्य ध्रुवमचिरेण हरामि ते विभूतीः ॥ ६८ ॥

पुरुषोत्तमः—मन्ये ममापहरिष्यसे विभूतिम्। आकलय तावदस्ति मयि किंचित्, आहोस्विदकिंचनोऽसि।

पुरुषः—हन्त, प्रपञ्चप्रसारणाकुशलैनेन्द्रजालिकस्य तव नाधुना कमपि प्रकारमुपलक्षयामि।

---

१. अमृतनिधानस्थानस्य द्वारि दृष्टिविषो नाम सर्पः, स यं पश्यति तं द्वितीयो जनो न पश्यतीति तस्य भस्मीभूतत्वात्। त्वां तु मोक्षद्वारि वर्तमानं यः पश्यति स द्वितीयं न पश्यति। अतः कुटिलगतित्वेन सधर्मणो दृष्टिविषात् त्वमतिरिच्यस इति भावः. २. अविद्यावशादपरीक्षितस्त्वम्। प्रकाशलेशमन्तःकरणवृत्त्यवच्छिन्नं चैतन्यं पूर्वं वितीर्णवानसि। संप्रति तु संनिकृष्टे त्वयि विषयाकारान्तःकरणवृत्तेरभावात्तदपहार इति त्वयि मत्स्वरूपस्य विलयः त्रिदण्डिसिद्धः प्राप्त इति प्रस्तुतोऽर्थः। अप्रस्तुतेनोडुरविवृत्तान्तेन प्रतीयते। बलवतापहृतधनः क्षुद्रः शरीरं त्यजति इति लोकसिद्धो वृत्तान्तश्चात्र गुणीभूय भासते। नैयायिकमते तु नित्यचैतन्यस्त्वमेनित्यं मयि व्यतारीः, इदानीमनुध्यानसाक्षात्कृतः, तदपि जिहीर्षसि चेत्वदुपरि त्वामुद्देश्यैव निजं वपुरपुनर्भवाय त्यजामीति योज्यम्. ३. अनेन भेदापगमावस्थालक्षणो मोक्ष उपलक्ष्यते. ४. प्रहासे पुरुषव्यत्ययः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गुणगणमपनीय चित्तकूपे मम निगमैः सहसा निपातितोऽसि ।
अमृतकलश तिष्ठ तिष्ठ नातः परमपि जीवनमुद्धरिष्यसे नः ॥ ६९ ॥

पुरुषोत्तमः—वत्स, औपनिषदैरदृश्यमानोऽपि मम गुणगणो न प्राकृतपुरुषस्यवत्परमार्थतो विलीयते। पश्य ।

सपदि गुणगणोऽयमूर्णनाभेर्विलयमुपैति वितायते च भूयः ।
जनजडिमभिदा पटुः पटस्तु क्षणमपि न क्षमते क्षयं गुणानाम् ॥७०॥

पुरुषः—अधुना प्रबोध्यमानोऽप्यात्मानमपि गुणवन्तं नावधारयामि, कुतो भवन्तम् ।

भुवनभवनभासनप्रदीप न्यपतदसौ त्वयि चेतनापतङ्गी ।
क्षणमधिकमदीप्यत ज्वलन्ती पुनरजहात्प्रथमामपि स्वसत्ताम् ॥ ७१ ॥

पुरुषोत्तमः—तत्त्वतो ज्ञाते मयि तत्त्वविदामात्मा प्रतिभाति । तत्कथय कीदृशं स्वमवधारयसि ।

पुरुषः—देव, पश्यामि ।

न धरणिसलिला न चापि वायुर्न खमत एव न खानि नापि वर्ष्म ।
न समयककुभौ न चिन्न चित्तं पुरुषपुरंदर पूरुषस्तवास्मि ॥ ७२ ॥

पुरुषोत्तमः—मया नाथवन्तमात्मानमनुध्यायतस्तव स्फुरन्निवोपलक्ष्यते मयि स्वतादात्म्यारोपः ।

पुरुषः—एवमेतत् ।

---

१. निर्गुणं ब्रह्म उपनिषदा हृदि प्रवेशितं जीवनोद्धरणलक्षणां प्रेत्यभावपरम्परां निराकरोति। यथा त्रुटितगुणः कलशः कूपे प्रविष्टः स्थिरमवतिष्ठते, न तु जलमुद्धरतीति ध्वनिः. २. त्वयि निवेशिता चेतना कर्तृत्वादिप्रकारानुल्लिखन्ती सार्वज्ञरूपेण प्रथमं परिणनाम । ततः कर्तृत्वादिप्रकारानपहाय निर्धर्मकं त्वामवल[ल]म्बे । अथ स्वरूपेणापि निर्वाति । यथा पतङ्गी प्रदीपे पतिता क्षणं ज्वलति ततो भस्मभूता स्वशरीरं त्यजतीति गम्यते. ३. स हि तत्त्वतो ज्ञातः स्वात्मसाक्षात्कारस्योपकरोतीति टीकादर्शनात्. ४. प्रथममितरत्वेनात्मसाक्षात्कारः, स एव संसारबीजवासनामूलं करस्थं सहकारिणमासाद्योपनिषद्वाक्यार्थबोधसहकृतेन मनसा जीवपरमात्मनोरभेदः साक्षात्क्रियते.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitized by eGangotri.Funding: MIDF

असकृदनरदस्मिता नटी मे विहितपदा मशके मतङ्गजेन ।
ध्रुवमुपरि तृणाधिरोहतीयं भव महतोऽपि महानणोरणीयान् ॥ ७३ ॥
हा, किमेतत् ।
विगलदवयवं विकारमात्रारहितमनिन्द्रियमक्रियं पुराणम् ।
त्वमसि तदिति चेतनामयं मामुपनिषदोऽपि बत प्रमोहयन्ति ॥ ७४ ॥
जगज्जनक, जानामि गतमिदानीं मम संचरचर्चया ।
दिगपदिशविपर्ययोऽपि पुंसामभिमतसंसरणक्रियां रुणद्धि ।
मम तु भवकदध्वगस्य कोऽपि त्वमहमिति प्रथितो महान्प्रमोहः ॥७५॥
किं वा कृते प्रतिकृतमेवैतत् ।
मयि परमविभौ विशुद्धसत्त्वे यदिह शरीरतदात्मतामधास्त्वम् ।
निगमपुरुष तत्प्रतिक्रियायै त्वयि निदधामि समस्तवस्त्वभेदम् ॥७६॥
पुरुषोत्तमः—वत्स, सेयमपवर्गनगरगोपुरायमाणा दशा भवतु मोहमयी न पुनरेनामवधीरयिष्यसि ।
पुरुषः—एवमेतत् ।
शमितजडतदात्मताप्रमोहो विमलयति त्वदभेदविभ्रमो माम् ।
प्रकृतिमुपनयन्ति वारिधानीं कतकरजांसि रजोऽन्तरापकर्षात् ॥ ७७ ॥
पुरुषोत्तमः—पुरुष, कथय कमर्थमिदानीमर्थयसे ।
पुरुषः—पुराणपुरुष,
व्यवधिरुपरराम भूर्विविक्ता प्रभवसि गूढगतिर्न मां प्रहर्तुम् ।
तदिह भवतु तावदेकशेषापरविलयावधिरावयोर्विमर्दः ॥ ७८ ॥

---

१. नटी स्थूलसूक्ष्मेषु वस्तुषु विहितारोहणाभ्यासा सूक्ष्मतरं सूत्रादौ स्थूलतरे प्राकारादावारोहणे क्षमते। इयमस्मिता तु मशकमतङ्गजशरीरपरिग्रहदशायां सूक्ष्मस्थूलवस्त्वारोहणे कृताभ्यासा स्थूलतरं सूक्ष्मतरत्वात् त्वामारोढुमर्हति। त्वंतु श्रुत्या द्वेधापि प्रतिपाद्यस इति भावः. २. तत्त्वमसीत्यादयः श्रुतयोऽमुमेव जीवन्मोक्षमात्मनोरभेदारोपमुत्पाद्य कृतार्था भवन्ति। स चारोपः स्वात्मसाक्षात्कारे उपयुज्यते। स निर्वाणनामनि निश्रेयसेन खल्वेतोपनिषदः कृत्स्नाग्नि विधौ शेषीभूताः परम्परया परमपुरुषार्थसंबन्धादेव स्वाध्यायविधिविषयत्वोपपत्तेरिति भावः. ३. व्यवधिरित्यादित्रिदण्डिमतसिद्धः परमात्मनि जीवात्मविलयो नाम मोक्षः प्रस्तूयते। स च पूर्वं दुर्गादिनिगूढस्य प्रच्छन्नं प्रहरता पश्चादुद्घाटितव्यवधेर्विविक्तभुवमागत्य विमर्दमाचरत एक···विनाशफलको वृत्तान्त इवेति ध्वन्यते.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुरुषोत्तमः—न[1] संभवति नित्ययोरावयोरेकतरस्यापि विलयः । तन्मया सह भेदाभेदताटस्थ्येन निखिलेतरविषयपरिहारेण च स्वमात्मानमनुशीलय । अहमपि हि तत्त्वतो ज्ञातः स्वात्मसाक्षात्कारस्योपकरोमि पुरुषाणामिति ।

पुरुषः—(सकरुणम् ।) अरे अनारतप्रबोधमहिमन् अभङ्गुरगुणनिधे,

सुभगपरिचयं जहाति चेत्त्वामतिचपला मम चित्तचेतनेयम् ।
परिणतिजडिमप्रकर्षदुःस्थे भिदुरगुणे मयि सा कथं रमेत ॥ ७९ ॥

तथापि भवदादेशतः पश्यामि केवलमात्मानम् ।

(नेपथ्ये ।)

हंहो पुरिसाण उत्तम, अणुप्पण्णप्पसवा अम्हे। ण जुज्जइ अम्हाकं मूलुच्छेदो । (क)

पुरुषोत्तमः—सोऽयमनारब्धव्यापारकः कर्मगणो विलीयते ।

पुरुषः—त्यक्ता मया तर्हि संसारकान्तारमरुषु संसरणचर्चा ।

स्तनकलशमुखेन वा जनन्यास्तनयकराङ्गुलिमध्यकुल्यया वा ।
मुहुरहमपिबं पयांसि यस्मात्तदिदमशुष्यत जालमाशयानाम्[3] ॥ ८० ॥

(नेपथ्ये ।)

हा आवुअ, सिसिरभिसिणिसण्डो व्व तुमं विलीनो मा जाण क्खणंपि अम्हे जीआमो त्ति । हा वच्छे पउत्ति, तुअं पि अणाहा असरणा विपज्जिहसि । (ख)

(क) हंहो पुरुषाणामुत्तम, अनुत्पन्नप्रसवा वयम् । न युज्यतेऽस्माकं मूलोच्छेदः ।

(ख) हा आवुक, शिशिरबिसिनिखण्ड इव त्वं विलीनो मा ज्ञासीः क्षणमपि वयं जीवाम इति । हा वत्से प्रवृत्ति, त्वमप्यनाथाशरणा विपत्स्यसे ।

---

१. विलयो न ध्वंसो न वा भेदध्वंसः, तयोर्नित्यत्वादिति भावः. २. अभेदसाक्षात्कारानन्तरं केवलात्मालोचनम्। तदाहत्यैवानारब्धव्यापारकाणि कर्माणि क्षिणोति, तदिदानीं प्रस्तूयते—तन्मयेत्यादिना. ३. प्रेत्यभावप्रयोजनकः कर्माशयगणो जलाशयाभेदेनाध्यवसीयते.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

पुरुषोत्तमः—पश्य पुरुष, त्व विवेकप्रदीपे पतङ्गवृत्तिमाश्रित्य विलीने महामोहे कुमारौ रागद्वेषावपि प्रवृत्तिविलयाय विरमतः ।

पुरुषः—हन्त, विरतेषु चिरंतनप्रियसुहृत्सु दोषेषु विरतजन्मफलो विदलद्विनश्यदाशाग्रन्थिर्मुहूर्तं क्वचिद्विश्रमितुमिच्छामि ।

पुरुषोत्तमः—वत्स, तदिदमग्रतः कायारण्यम् । इह विश्राम्य तावद्-चिरमिह परिचरिष्यन्तस्त्वां प्रतिपालयन्ति फलवन्तः कर्माश्रयतरवः ।

पुरुषः—नाथ, भुक्तानि कायारण्ये कर्मतरुफलानि । विलीनं सपादपमरण्यम् । अयं पुनः को नाम ।

नोर्ध्वं धावन्नवनिवलयान्नाम्बरालम्बमानो
दिग्भ्यस्तिर्यङ् न च विचलितो नान्तरैव प्रसूतः ।
आनन्दाब्धेरपगततटद्वीपवेलाविभागः
पूरः पारे वचनमचिराद्विश्वमेकीकरोति ॥ ८१ ॥

पुरुषोत्तमः—अयमानन्दसमुद्रोऽनुषङ्गलभ्यो हेय एव दृष्टानुश्रविकानन्दवेदपवर्गपान्थानाम् ।

सुखकामः परानन्दमप्राप्यैहिकमिच्छति ।
अभावे मत्तकाशिन्या दृष्टा तिर्यक्षु कामिता ॥ ८२ ॥

तद्विश्रामानन्दकक्षामतिक्रम्य कैवल्यभूमौ निर्वाणं नामापवरकमाश्रित्य विश्राम्यतु भवान् ।

---

१. यद्यपि वाह्यविषयाभेदभ्रममूलवासनाखरूपो महामोहः प्रागेव विलीनः, तथापि जीवपरमात्माभेदभ्रममूलं(ला) वासना सांप्रतमेव लीयते । तेनेदानीं महामोहविलयोऽनुशोचितः. २. मोहविलयादागद्वेषयोर्विलयः, तद्विलयात्प्रवृत्तेर्विलयो जन्मनस्ततश्च—इति जन्मविलयान्तो, जीवन्मोक्ष इह प्रस्तुतः । तदेतत्सूचयति—विरतजन्मफल इति । एतेन 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः' इति पारमर्षं सूत्रं व्याख्यातम्. ३. निर्वाणनाम्नोऽपवर्गस्य प्राक्काले कायारण्यद्वारारब्धव्यापारकर्मफलानामशेषतो भोगः । ततो ज्ञानफलमानन्दभोगः 'आनन्दं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठितम्' इति श्रुतिसिद्धः । तं प्रस्तौति—अयं पुनरित्यादिना. ४. दृष्टो वैषयिक आनुश्रविको वैदिक आनन्दो यथा न कमनीयः वैज्ञानिकोऽपि । तस्याकाम्यत्वे न्यायमाह—सुखकाम इति. ५. दुःखानामत्यन्तविलयो निर्वाणम्.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुरुषः—इदं तावत्प्रागपि सुषुप्तता मया ध्यासितमासीदिति प्रत्यभिज्ञायते ।

इदमपवर्गकं तदेव यस्मिन्नसकृदहं निरर्गलं निशि प्रविश्य ।
विगलितवरणाङ्गहिर्विहीनात्कथमधुना सदनादितो त्रियाम् ॥ ८३ ॥

पुरुषोत्तमः—विद्यते भवदध्यासिताध्यासयिष्यमाणयोर्निवृत्त्य पवरकयोः सूक्ष्मो भेदः । तदधुना विरमति भवदिवसे प्रकाशराशिरयमपि तिरोभवति । तदसौ सुदृष्टः क्रियताम् ।

पुरुषः—(नाट्येनार्घ्यविधिं निर्वर्त्य ।) भगवन् अशेषभुवनभावनत्रयीपुरुष, ध्रुवमियमपवर्गरात्रिसंध्या भवति यतस्त्वयि निर्भरोऽनुरागः ।
रुचिमयचरमोऽयमञ्जलिस्ते ननु न चिराद्भविता भवानदृश्यः ॥ ८४ ॥

(इति निष्क्रान्ताः सर्वे ।)

इति तुरीयोऽयमात्मदर्शनं नामाङ्कः ।

पञ्चमोऽङ्कः ।

(ततः प्रविशति श्रुतिरान्वीक्षकी च ।)

श्रुतिः—ततस्ततः ।

आन्वीक्षकी—ततश्च प्रमित्यनुमितिसिद्धिभिः सहचरिद्धर्मणः पुरुषस्य प्रादुर्बभूव विलीने च सान्वये महामोहे कैवल्यभुवमागते पुरुषे अतिरोबभूव पुरुषोत्तमः ।

(नेपथ्ये ।)

भगवन् अनिमित्तमैत्रीमयचरित्र निष्कारणकरुणारत्नाकर शंकर,
त्यक्ताध्वन्यसुहृज्जनस्य तरतः कान्तारमेकाकिनः
प्रच्छन्नेन सखे त्वया वसतयो भोगार्थं मे निर्मिताः ।
संसाराध्वविरामसीमनि मनागेकात्मवत्संगते
विश्लिष्टे त्वयि केवलस्य गलितः सर्वः प्रकारो मम ॥ १ ॥

---

१. सुषुप्त्यवस्थासजातीयमेव निर्वाणम्—'अहरहरस्माल्लोकादमुं लोकमपि यान्ति' इति श्रुतेः—इति प्रकरणार्थः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitized by eGangotri.Funding: MIDF

विगलितगुणसामान्यं केवलमात्मानमालोच्य ।
पुरुषोऽननुभूतचरं चरमतरं दुःखमनुभवति ॥ २ ॥

श्रुतिः—वत्से, एतदवसानानि पुरुषस्य व्यवसितानि । असावेव चास्य दुःखानामत्यन्तविमोक्षाय यदपवर्गप्रतिष्ठा नाम । प्रतिष्ठिते च प्रशान्तिसामैकधने राजन्यपवर्गे

पुरुषस्यास्य नगरे न भेदो न च विग्रहः ।
भेदविग्रहमूलस्तु दुःखदण्डः पतेत्कुतः ॥ ३ ॥

तदभिषिच्यतामपवर्गः क्षेत्रज्ञनगराधिपत्ये ।

(प्रविश्य ।)

बुद्धमार्गः—नमो भगवते तथागताय ।
क्षणिकाणुसंचयमये त्रिविष्टपे स्थिरता कथं भवतु चेतनात्मनः ।
चितिसंततिर्गलितवासनावलिर्विषयोपरागरहिता निरुध्यते ॥ ४ ॥

स एष ममापत्यं क्षीणवासनो विलीनक्लेशत्रयनिरुद्धो विषयोपरागरहितो वा चेतनासंतानो नामापवर्गः साम्राज्येऽभिषिच्यताम् ।

आन्वीक्षकी—भद्र श्रवणकमार्ग, कस्ते विषयः ।

मार्गः—नैरात्म्यं क्षणिकता च । मया गृहीतो हि पुरुषो न दवीयः कलं कामयते, न प्रवर्तते, न कर्मसंस्कारस्कन्धेन सीव्यते, न संसरतीति ।

आन्वीक्षकी—दुर्दर्शनकथामपि मादृशेन जनेन नार्हसि, यस्तावदात्मानमेव न चेतयसे ।

मार्गः—स्त्रीत्यवज्ञाता प्राणिहि । न हि त्यजाम्यहिंसाधर्मम् । (इति निष्क्रान्तः ।)

श्रुतिः—अरे विद्याः, प्रवेशयतापवर्गम् ।

---

१. पुरुषस्य लिङ्गशरीरावच्छिन्नस्य जी[व]क्षेत्रज्ञनगरे शरीरोपाधिप्रयुक्त एव भेदः । विग्रहशून्यतायां च न भेदसंभव इति वृत्तान्तः सामान्युपायचतुष्टयवृत्तान्ताभिदेनाध्यवसीयते. २. क्षीणवासनाचित्तसंवृतिरपवर्ग इति योगाचाराः । रागद्वेषमोहात्मकक्लेशत्रयविलयस्वरूपनिरोधवती सा तथेति सौत्रान्तिकाः । विषयोपरागरहिता चित्तसंततिरसाविति वैभाषिकाः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(प्रविश्य)

अर्हत्सिद्धान्तः—णमो अलिहन्ताणम् ।

णिज्जरजज्जलुसंवलविहुडिअगलिअट्ठविधवन्धा ।

अच्छिण्णघणाणन्दा मुत्तप्पाणो जअन्ति जिणा ॥ ९ ॥

एषे मह पुड्डे पूडे अवले अ ओवग्गे । (क)

आन्वीक्षकी—भद्र भदन्तसिद्धान्त, कस्ते विषयः । कोऽयमपरः परस्तवापवर्गः ।

सिद्धान्तः—णिम्मले विण्णाणमए सलीलपरिणामे अप्पा मह विसए णिलावलणाह जीअविहङ्गाह अवाहआ सुहदसा ठिई णाम अवले ओवग्गे । उद्धगइ णाम पलममोक्खे । (ख)

आन्वीक्षकी—(सक्रोधम् ।) अरे दौवारिकदर्शनानि, निरुध्यन्तामम्मी पाखण्डाः ।

सिद्धान्तः—कडुअभाशिणि, अज्जेव्व शाहेमि । (ग) (इति निष्क्रान्तः ।)

(ततः प्रविशतः सिद्धान्तौ पाशुपतो वैष्णवश्च ।)

पाशुपतः—अये, लोकविरुद्धैः सर्पदहनधारणगरप्राशनादिभिर्वेदविरुद्धैर्ब्रह्ममूर्धव्रश्चनदारुवनद्विजविध्वंसनादिभिरपि निर्लेपस्य स्वतन्त्रतया वशीकृतसिद्धेर्न केवलं पशूनामेव किंतु पशुपाशवन्धमोक्षाणामपि प्रभवतो दुरवगाहा विभूतयः ।

(क) नमो अर्हद्भ्यः ।

निर्जरजर्जरसंवरविघटितगलितार्ष्टविधवन्धाः ।

अच्छिन्नघनानन्दा मुक्तात्मानो जयन्ति जिनाः ॥

एष मम पुत्रः परश्चापरश्चापवर्गः ।

(ख) निर्मलो विज्ञानमयः शरीरपरिणाम आत्मा मम विषयो निरावरणस्य जीवविहङ्गस्याव्याहता सुखदशा स्थितिर्नामापरोऽपवर्गः । ऊर्ध्वगतिर्नाम परममोक्षः ।

(ग) कटुभाषिणि, अद्यैव साधयामि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitized by eGangotri.Funding: MIDF

विधिवशमिलितो भवाध्वयात्रां हरसि जगत्तिलपेषतैलिकोऽसि ।
न तव पशुपते विदन्ति पाशं पिहितदृशः पशवः परिभ्रमन्ति ॥ ६ ॥

अपि च ।

कुर्दम्भजम्भरिपुधर्षितधर्मद्वार-
रूपानुरूपवचसो वत गोतमस्य ।
कः श्रद्दधीत गिरि किंतु भवच्छरीर-
सारूप्यलब्धविभवं वपुरेव मोक्षः ॥ ७ ॥

स एवं विरूपाक्षसारूप्यं नामापवर्गोऽभिषिच्यताम् ।

वैष्णवसिद्धान्तः—

दहनमभिविशन्तु कर्मतन्त्राण्युपनिषदा सह दह्यतां विवेकः ।
मम तु भवतु भूतिभाजि भक्तिर्भगवति वारिदभासि वासुदेवे ॥ ८ ॥

अपि च ।

वरं वृन्दावने रम्ये शृगालोऽपि भवाम्यहम् ।
गोतमोक्तां पुनर्मुक्तिं गोतमः प्रतिपद्यताम् ॥ ९ ॥

स एष साम्राज्यमर्हति वैकुण्ठसालोक्यं नामापवर्गः ।

आन्वीक्षकी—अरे, स्वर्गप्रभेदेष्वपवर्गाभिमानिनोरुपासनाभक्तिश्च निःश्रेयसोपाय इत्यापाततो भ्राम्यतोर्भवतोर्भविष्यति काले विज्ञानाधिकारः ।

(प्रविश्य)

कर्मकाण्डः—अरे आङ्गिरसि, किं नाम विज्ञानम्, कस्मै प्रयोजनाय कल्पते । नित्यनैमित्तिकानुष्ठाननिषिद्धाननुष्ठानाभ्यां पापस्य काम्यकर्मसंन्यसनात्पुण्यस्यानुत्पत्तौ प्रागुत्पन्नयोस्तयोर्भोगात्प्रक्षय इति प्रव्रज्याकर्मैव निश्रेयसं साधयति । कर्मणैव हि संसिद्धिमास्थिता जनकादयः श्रूयन्ते ।

आन्वीक्षकी—अरे निरीश्वरतया स्वतन्त्र, कथमेकेन जनुषा विना समाधिमनुत्पन्नकायारण्यो जन्मसहस्रोपभोग्यानि सुकृतदुष्कृतानि भुञ्जीत, भुञ्जानो वा कर्माशयैः कथं न सीव्येतासंति विज्ञाने(ऽ)संन्यासिजनः । भाव, भावयतु भवानन्यः को नाम समाधेरगस्त्य इव समुद्रमाचामति, स इव दण्डकारण्यं सृजतीति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाशुपतवैष्णवसिद्धान्तकर्मकाण्डाः—नास्त्यवकाशोऽस्माकमिह । (इति निष्क्रान्ताः ।)

(ततः प्रविशति सेश्वरमीमांसाद्वयम् ।)

प्रथमा—सोऽयं विज्ञानसमुच्चितस्य कर्मणोऽपत्यमानन्दभोगो नामापवर्गः ।

आनन्दोऽयमखण्डसुन्दरवपुर्मूढस्य संसारिणः
प्रच्छन्नो वसति स्म तेन हि नृणां नासीदसौ गोचरः ।
संन्यासेन कृताकृते प्रशमिते ज्ञानेन मोहे हते
धन्योऽनन्यधनो निरन्तरममुं मोक्षं जनो भोक्ष्यते ॥ १० ॥

द्वितीया—सखि, साधु मन्त्रयसे । स्वरूपलाभ एवायं पुरुषस्य यदानन्दाभिव्यक्तिर्नाम ।

निस्तीर्णः सरिति पुरा गिरा परेषामात्मानं दशममजीगणन्त भौताः ।
आनन्दस्थगितनिजस्वरूपलाभः पुंसोऽभूदुपनिषदा प्रबोधितस्य ॥ ११ ॥

श्रुतिः—पुत्रि धर्ममीमांसे, वत्से ब्रह्मविद्ये, शरीरपरतन्त्रो युवयोरानन्दभोगः, न ह्यशरीरं प्रियाप्रिये स्पृशतः । तदयं जीवन्मोक्षोऽपवर्गस्य द्वारि तिष्ठतु । [वत्से बादरायणि,] त्वमेनमेकं दण्डं गृहीत्वा प्रतिपालय ।

ब्रह्मविद्या—भगवति, किमेकेन दण्डेन । मयास्य प्रतिपालनाय गृहीतास्त्रयो दण्डाः । अयं पुनरानन्दमये परमात्मनि जीवस्य जीवभेदस्य वा लयो नामापवर्गः परमदेऽभिषिच्यताम् ।

श्रुतिः—अयि सरले, सहजौ सखायाविमौ सुपर्णौ । ये नाम परापरे ब्रह्मणी तयोरेकतरस्यान्यत्र न युज्यते विलयः । भेदस्तु पाषाण इव पयसि पातितः प्रयत्नशतेनापि न विलीयते ।

ब्रह्मविद्या—तदयमाम्नायविशुद्धो निरन्तरप्रेत्यभावनिदानस्य लिङ्गशरीरस्य विलयो भवत्याः प्रसादमर्हति ।

आन्वीक्षकी—भगवति श्रुते, को दोषः । सदा तिष्ठत्वयमग्रतो निर्वाणस्य ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

श्रुतिः—बाढम् ।

ब्रह्मविद्या—महानयमनुग्रहो भगवत्याः ।

(प्रविश्य)

सांख्ययोगौ—भगवति, बुद्धिवृत्तिनिगमादपातविषयोपरागविप्लवायाश्चित्ति(ति)शक्तेः स्वरूपावस्थानं नाम विवेकख्यातिपुत्रोऽयमपवर्गपदेऽभिषिच्यताम् ।

श्रुतिः—नन्वयं केवलस्यात्मनो निष्प्राकारकमालोचनं नाम ब्रह्मबोधोऽपवर्गस्य पितापि चपलप्राणतया नाभिषिच्यते ।

आन्वीक्षकी—आयुष्मन् निर्वाणनामन् अपवर्ग, इत इतः ।

(ततः प्रविशत्यपवर्गः ।)

अपवर्गः—भगवति श्रुते, कनिष्ठे भगवत्यान्वीक्षकि, भगवत्यः प्रमाणविद्याः, विवेकपुत्रो निषेधगोत्रोऽहमपवर्गनामाभिवादये ।

सर्वाः—वत्स, दीर्घतमेनायुषा वर्धस्व ।

मीमांसा—वत्स, प्रभाकरालोकेन प्रत्यभिज्ञातोऽसि । सत्यमसि निषेधगोत्रः, विवेकेन तु पालितः केवलमभूर्न पुनः कस्याप्यपत्यं भवसि ।

अपवर्गः—मातर्, अहमधुनैव जातः ।

श्रुतिः—वत्स अपवर्ग, इह सिंहासने तावदुपविश । त्वामभिषेक्ष्यामः क्षेत्रज्ञनगराधिराज्ये ।

(अपवर्ग उपविशति ।)

सर्वाः—(रत्नकलशैरभिषिच्य निरूप्य ।) यत्सत्यमेवंविधमखिलविषयातिशायिनमपवर्गस्य सुभगभावमवलोक्य जानीमः ।

बुद्धिः शरीरं विषयेन्द्रियाणि सुखं च दुःखैकनिकेतनानि ।
विवेकिने केवलमात्मविद्याविद्योतितात्मा स्वदतेऽपवर्गः ॥ १२ ॥

श्रुतिः—वत्स अपवर्ग, अभिषिक्तः क्षणं दृष्टोऽसि । द्रक्ष्यमाणः प्रीणयस्यास्मान् । इच्छामि तव प्रतिष्ठेतिवृत्तस्य केनापि कविना प्रणीतं सारस्वतं प्रबन्धम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मीमांसा—प्रत्यक्षपरिकलितेऽर्थे किं कविप्रबन्धेन।

आन्वीक्षकी—मा मैवम्।

संकेतकेतनोन्मुखदयिताकरतर्जनीव कविसूक्तिः।
दृष्टमपि दर्शयन्ती रमयति चेतांसि चतुराणाम्॥ १३॥

(श्रुतिः सरस्वतीमनुध्यायति।)

(ततः प्रविशति सरस्वती।)

सरस्वती—साधु रे नवनवसारस्वतसंसारनिर्माणनूतनप्रजापतयो वात्स्यायनवंशवर्धनाः कवयः,

न स्पृष्टाः कुशकर्कशैस्त्रिभुवनस्रष्टुः करैरष्टभिः
श्रीभर्तुर्न कदर्थिताः करुणया कोपेन वा धूर्जटेः।
तेऽस्मेऽपि मया पदैर्न मृदिताः सत्यं रसेभ्यः शपे
युष्माभिर्विषयेषु येष्वभिनवः पन्था ममोन्मीलितः॥ १४॥

(निरूप्य।) इयमपूर्वा कापि पद्धतिः।

कथमेकतः शशीधराश्मकर्कशा क्षरति क्षपाकृदुदयादिवामृतम्।
परतः पयोरुहपलाशपेलवा परिवाहिणं रसमसौ निषिञ्चति॥ १५॥

तन्नूनममीषामपारसारस्वतसंसारसरणिपरिकर्मनिर्माणमर्मविदां निह्नुवां वात्स्यायनवत्सानामेकतमस्य प्रातिभोऽयं पन्थाः। ते हि माध्यंदिनमूर्धन्याः

सुभाषितेर्ष्याकलुषसुलोचनविषानलैः।
फणं दहन्ति शेषस्य ततः फणदहा मताः॥ १६॥

श्रुतिः—वत्से आन्वीक्षकि, सत्यमाह गिरां देवी। भवन्त्येवंविधा एव फणदहद्विजाः। पश्य।

निगमसरसोमाने दण्डाः प्रमत्तसरस्वती-
स्खलनपतनारम्भे हस्तावलम्बनयष्टयः।

---

१. 'फन्नावार' इत्याधुनिकमैथिलपञ्जीप्रचरितः. अद्याप्येतद्वंशजा द्विजा भूषयन्ति मिथिलास्थमद्दरौनीग्रामम्.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDE

सुकृतसदनोपादानं ते भवन्ति भजन्ति ये
रुचिपतिकवेर्वंशस्तम्बप्ररोहकरीरताम् ॥ १७ ॥

सरस्वती—(उपसृत्य ।) नमोऽस्तु तुभ्यं पाञ्चगीताभिनयरसानामुत्पत्तये गृहीत ऋक्सामयजुरथर्वमूर्तये भवत्यै श्रुतये ।

श्रुतिः—स्वदन्तां सामाजिकजनाय तव भावा रसाश्च ।

सरस्वती—भगवति निखिलवाङ्मयलतासंतानमूलशल्लके, कथमनुध्यानेन पावितोऽयं जनः ।

श्रुतिः—वत्से, प्रतिष्ठितमपवर्गे सरसेन वाक्प्रबन्धेनोपश्लोकयितुमादिश क्वापि देशे कमपि कवयितारम् ।

सरस्वती—नान्यत्र निमिजनपदादीदृशाः कार्कश्यकोमलताकरम्बितप्रबन्धकवयः संभवन्ति । पश्य ।

गाढोपगूढदयितापुलकाङ्कितार्धो
निष्टप्ततैलपरिमृष्टतदन्यभागः ।
सीरध्वजो नरपतिः प्रबभूव येषां
ते तादृशान्प्रसुवते विदुषो विदेहाः ॥ १८ ॥

तेषामपि मध्ये माध्यंदिनचरणगुरवो वत्सवंशवर्धनाः फणदहद्विजा एव जानते समाधिजमथ च ध्वनिजन्मानमानन्दमेकपदेऽनुभावयितुम् ।

श्रुतिः—तत्र वंशे विद्यत एव विद्यानिधिः पीताम्बरो नाम, यः किल

प्रकृतिगहने तन्त्रे वैशेषिके विवृतिं व्यधा-
दकुरुत चतुर्वर्गव्याख्यामृतानि च भारते ।
भरतवचसां तत्त्वख्यात्यै निबन्धमभाषत
व्यतनुत तथा तिस्रो वाणीविलासकविः कथाः ॥ १९ ॥

सरस्वती—(साक्षम् ।) देवि, मुषिता वयममुना मध्यमं भुवनमपजहता वत्सेन वंशवंशवर्धनेन विद्यानिधिना ।

अशरणमभूद्ब्राह्मं वर्त्मो निरिन्धनमैधत
ज्वर इव भुजो देव्या दुःसंवरः कलिसंज्वरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभजत कथाशेषो धर्मः परैरुपलक्ष्यता-
मकुरुत यदा विद्वान्विद्यानिधिर्द्विगुरुं दिवम् ॥ २० ॥

आन्वीक्षकी—भगवति, सत्यमेषा मुग्धिता तपस्विनी । पश्य ।

अवितथवचोबन्धे चिन्ताधशंवदवाङ्मये
विदिति निखिला विद्या विद्यानिधौ दिवमीयुषि ।
इयमशरणा वाचां देवी लभेत कमाश्रयं
विदितमथवा कृष्णद्वैपायनो भुवि जीवति ॥ २१ ॥

श्रुतिः—सत्यमेष न विशिष्यते बादरायणो विद्यानिधेः पीताम्बरात् । तथा हि तस्य

न धुतसमया न ग्राम्या न च्युतक्रमसंस्कृति-
र्न रसरहिता नाश्लीला न प्रसिद्धिविरोधिनी ।
न जनितपरोद्वेगा न स्तोकमप्यनृते स्थिता
प्रकृतिगदिताप्यासीद्विद्यानिधेर्विबुधस्य वाक् ॥ २२ ॥

सरस्वती—भगवति, न केवलमहमेव निःशरणतया सीदामि । यावदसौ सर्वेऽपि गुणगण एकं समुदायस्थानमलभमानो विप्रकीर्णो यतः कुतश्चिदवतिष्ठते । किं च ।

श्रुतमविनयः शौचं दम्भो दमं मतिविभ्रमः
शममलसता दानं गर्वः कुलं प्रबलो मदः ।
इति दिवमितः प्राप्ते विद्यानिधौ सहुदायतो
बत विघटितं धर्मं पाप्मा निहन्ति पदे पदे ॥ २३ ॥

श्रुतिः—वत्से, कथय कस्येदानीममृतोदग्प्रबन्धघटनभारमारोपयिष्यसि ।

सरस्वती—भगवति, अस्ति तस्य परापरब्रह्ममीमांसनमांसलविज्ञानवासनस्य सकलसारस्वतसंसारसरणिविभागविदो विद्यानिधेः पीताम्बरस्य चतुर्णां पुत्राणामेकतमो गोकुलनाथो नाम ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यो जन्मतश्च गुणतश्च मतः कनिष्ठः
श्रीमत्त्रिलोचनकवेश्च धनंजयाच्च ।
स श्रीजगद्धरधरातिलकाग्रजन्मा
निर्मास्यति प्रगुणतत्त्वरसं प्रबन्धम् ॥ २४ ॥

यस्य खल्वियं वाचोयुक्तिः—

अधिगतमुपाध्यायाद्विद्यानिधेरनुचिन्तितं
विरलविषयग्राहिण्यापि स्वया जडया धिया ।
बहुलमथवा स्तोकं यद्यन्मया श्रुतमर्जितं
परिणतिरियं तस्य प्रीतस्तयास्तु परः पुमान् ॥ २५ ॥

श्रुतिः—वत्स, प्रतिहतास्ते परिपन्थिनः । क्षेत्रज्ञनगराधिराज्याभिषिक्तः कविभिरुपश्लोक्यसे । किं ते भूयः प्रियमुपकरोमि ।

अपवर्गः—मातः, अहं पूर्णोऽस्मि । तदापीदमस्तु—

संसारात्प्राप्य निर्वेदं सर्वे निर्वाणलिप्सया ।
श्रवणान्मननाद्ध्यानात्पश्यन्तु पुरुषोत्तमम् ॥ २६ ॥

इति ॥

(निष्क्रान्ताः सर्वे ।)

इत्यपवर्गप्रतिष्ठा नाम पञ्चमोऽङ्कः ।

समाप्तमिदं श्रीगोकुलनाथोपाध्यायकृतममृतोदयं नाम नाटकम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MHDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu